# सुरभिः

## कक्षा 8



समग्र शिक्षा

मध्यप्रदेशराज्यशिक्षाकेन्द्रम्, भोपालम्



# राष्ट्रगान

जन-गण-मन-अधिनायक जय हे
भारत-भाग्य-विधाता
पंजाब-सिन्धु-गुजरात-मराठा
द्राविड़-उत्कल-बंग
विंध्य-हिमाचल-यमुना-गंगा
उच्छल-जलधि-तरंग
तव शुभ नामे जागे, तव शुभ आशिष मागे,
गाहे तव जय-गाथा।
जन-गण-मंगल-दायक जय हे
भारत-भाग्य-विधाता
जय हे, जय हे, जय हे,
जय जय जय जय हे।

(हर देश का अपना एक विशिष्ट झंडा और राष्ट्रगान होता है। ''तिरंगा झंडा'' भारतवर्ष का राष्ट्रध्वज है और ''जनगणमन'' राष्ट्रगान। राष्ट्रध्वज में ऊपर की पट्टी केसरिया रंग की और नीचे की हरे रंग की होती है। बीच की सफेद पट्टी के बीचों बीच २४ शलाकाओं का नीले रंग में गोल-चक्र होता है। केसरिया रंग त्याग का, सफेद शांति का और हरा रंग प्रकृति की सुन्दरता का प्रतीक है। चक्र का स्वरूप अशोक की सारनाथ-स्थित सिंहमुद्रा में अंकित चक्र की भाँति है यह चक्र सत्य और सब धर्मों का प्रतीक है।

राष्ट्रगान की रचना गुरूदेव रवीन्द्रनाथ ठाकुर ने की थी। इसमें संपूर्ण देश के लिए मंगल-कामना है। राष्ट्रगान और राष्ट्रध्वज का सम्मान करना हमारा कर्तव्य है। जब राष्ट्रगान गाया जाये या उसकी धुन बजाई जाये अथवा राष्ट्रध्वज फहराया जाये, तब हमें सावधान की स्थिति में खड़े होकर इसे सम्मान देना चाहिए।)



## प्रथमः पाठः

# लोकहितं मम करणीयम्

(संस्कृते गीतपरम्परा अति समृद्धा प्राचीना च। जनैःमनसिदृढ सङ्कल्पं कृत्वा कथमाचरणीयमित्यस्मिन् गीते वर्णितम्, गीतेऽस्मिन् जनेषु परोपकारभावनोत्पादनं दरीदृश्यते।)

मनसा सततं स्मरणीयम्, वचसा सततं वदनीयम्।
लोकहितं मम करणीयम्, लोकहितं मम करणीयम्॥1॥

न भोगभवने रमणीयम्, न च सुखशयने शयनीयम्।
अहर्निशं जागरणीयम्, लोकहितं मम करणीयम् ॥2॥ ॥ मनसा ॥

न जातु दुःखं गणनीयम्, न च निजसौख्यं मननीयम्।
कार्यक्षेत्रे त्वरणीयम्, लोकहितं मम करणीयम्॥3॥ ॥ मनसा ॥

दुःखसागरे तरणीयम्, कष्टपर्वते चरणीयम्।
विपत्ति-विपिने भ्रमणीयम्, लोकहितं मम करणीयम् ॥4॥ ॥ मनसा ॥

गहनारण्ये घनान्धकारे, बन्धुजना ये स्थिता गह्वरे।
तत्र मया सञ्चरणीयम्, लोकहितं मम करणीयम् ॥5॥ ॥ मनसा ॥

## शब्दार्थाः

| | | | | | |
|---|---|---|---|---|---|
| करणीयम् | - | करना चाहिये | त्वरणीयम् | - | शीघ्रता करनी चाहिये |
| दुःखसागरे | - | दुःख रूपी सागर में | कष्टपर्वते | - | कष्टरूपी पर्वत पर |
| गहनारण्ये | - | गहन वन में | गह्वरे | - | गुफा में |

## अभ्यासः

### 1. एकपदेन उत्तरं लिखत -

क. मनसा किं करणीयम् ?

ख. वचसा किं करणीयम्?

ग. कस्मिन् न रमणीयम्?

घ. किं न गणनीयम्?

ङ. किं न मननीयम्?

## 2. एकवाक्येन उत्तरं लिखत –

क. कुत्र त्वरणीयम्?

ख. कस्मिन् तरणीयम्?

ग. कुत्र चरणीयम्?

घ. विपत्ति-विपिने किं करणीयम्?

ङ. मम किं करणीयम्?

## 3. उचितं योजयत –

| | (अ) | (ब) |
|---|---|---|
| क. | मनसा | सततं वदनीयम् |
| ख. | वचसा | सततं स्मरणीयम् |
| ग. | भोगभवने | जागरणीयम् |
| घ. | लोकहितं | न रमणीयम् |
| ङ. | अहर्निशं | करणीयम् |

## 4. शुद्धवाक्यानां समक्षम् 'आम्' अशुद्धवाक्यानां समक्षं 'न' इति लिखत –

क. कष्टपर्वते चरणीयम्। [ ]

ख. दुःखसागरे न तरणीयम्। [ ]

ग. न जातु दुःखं गणनीयम्। [ ]

घ. विपत्ति-विपिने न भ्रमणीयम्। [ ]

ङ. अहर्निशं जागरणीयम्। [ ]

## 5. उचितपदेन रिक्तस्थानं पूरयत –

क. बन्धुजना ये स्थिता ..............। (सागरे / गह्वरे)

ख. लोकहितं .............. । (वदनीयम् / करणीयम्)

ग. भोगभवने ..............। (रमणीयम् / न रमणीयम्)

घ. कार्यक्षेत्रे ..............। (तरणीयम् / त्वरणीयम्)

ङ. कष्टपर्वते ..............। (करणीयम् / चरणीयम्)

**6. नामोल्लेखपूर्वकं समासविग्रहं कुरुत -**

क. लोकहितम्  ख. भोगभवने
ग. कार्यक्षेत्रे  घ. दु:खसागरे
ङ. कष्टपर्वते।

**7. रिक्तस्थानं पूरयत -**

क. न ............................गणनीयम् ........... मननीयम्।
...................... त्वरणीयम् लोकहितम्.................।।

ख. दु:खसागरे .............., कष्ट पर्वते ..............।
..............भ्रमणीयम्, ............. करणीयम्॥

**8. उदाहरणानुसारं धातुं प्रत्ययं च पृथक्कुरुत -**

| | | धातुः | + | प्रत्ययः |
|---|---|---|---|---|
| उदाहरणम् - | स्मरणीयम् | स्मृ | + | अनीयर् |
| क. | करणीयम् | ............. | + | ...........। |
| ख. | रमणीयम् | ............. | + | ...........। |
| ग. | शयनीयम् | ............. | + | ...........। |
| घ. | जागरणीयम् | ............. | + | ...........। |
| ङ. | गणनीयम् | ............. | + | ...........। |
| च. | मननीयम् | ............. | + | ...........। |
| छ. | त्वरणीयम् | ............. | + | ...........। |
| ज. | तरणीयम् | ............. | + | ...........। |
| झ. | भ्रमणीयम् | ............. | + | ...........। |
| ञ. | सञ्चरणीयम् | ............. | + | ...........। |

**9. ''मम कर्त्तव्यम्'' इति विषयमवलम्ब्य संस्कृते दशवाक्यानि लिखत।**

**10. ''लोकहितं मम करणीयम्'' इत्यस्मिन् पाठे आगतानि अव्ययानि चित्वा लिखत।**

**योग्यताविस्तारः -**

- ''लोकहितं मम करणीयम्'' एतत् गीतं लयबद्धं गायत।
- ''लोकहितं मम करणीयम्'' इत्यस्मिन् पाठे आगतानि सप्तमीविभक्त्येकवचनरूपाणि चित्वा लिखत।
- ''लोकहितं मम करणीयम्'' अनेन सह अन्यानि अपि संस्कृतगीतानि कण्ठस्थं कुरुत।

*सर्वभूतहिते रताः।*

# द्वितीयः पाठः

# कालज्ञो वराहमिहिरः

H8Z4R7



अस्ति उज्जयिन्याः निकटे 'कपित्थ' (कायथा) नामाख्यो ग्रामः। तत्र आदित्योपासकः 'आदित्यदासः' नामा कश्चित् विप्रः प्रतिवसति स्म। तस्य गृहे 'वराहमिहिरः' नामा बालकोऽजायत। वराहमिहिरस्य जन्म 499 (नवनवत्यधिकचतुश्शतके) ख्रिस्ताब्दे सञ्जातम्।

बालकः वराहमिहिरः स्वकीयपित्रा एव ज्यौतिषविद्यामध्यगच्छत्। ततः सः पाटलिपुत्रनगरं गत्वा प्रसिद्धखगोलशास्त्रज्ञात् आर्यभटात् खगोलशास्त्रस्याध्ययनं कृतवान्।

तदानीम् उज्जयिनी विद्यायाः प्रमुखकेन्द्रमासीत्। उज्जयिन्यां गुप्तवंशस्य संरक्षणे बहुविधकला-विज्ञान-सांस्कृतिककेन्द्रादीनि संरक्षितानि वर्द्धितानि चासन्। अत्र नानादिग्देशेभ्यः विद्वज्जनानां समागमः भवति स्म अत एव वराहमिहिरोऽपि समाप्याध्ययनम् अस्मिन्नेव नगरं समागतः।

वराहमिहिरः वेदज्ञः वैज्ञानिकश्चासीत्। सः गतानुगतिकतायाः स्थाने वैज्ञानिकदृष्टिकोणस्य महत्त्वं प्रतिपादितवान्। ग्रहनक्षत्रप्रभावाश्रितं फलित-ज्यौतिषं नाम शास्त्रं तस्य प्रियप्रतिपाद्यविषयोऽभवत्। तेन कृता कालगणना प्रामाणिकी अस्ति। भारते फलितज्यौतिषस्य प्रथमः आचार्यः वराहमिहिरः एव अस्ति न तत्पूर्वं फलितज्यौतिषस्य शास्त्रं प्राप्यते भारते। एष एव सर्वप्रथमं प्रतिपादितवान् यत् चन्द्रस्य प्रकाशः स्वकीयः नास्ति, अपितु सः सूर्यस्य प्रकाशेन प्रकाशते।

वराहमिहिरेण बृहत्संहिता-बृहज्जातकं-पञ्चसिद्धान्तिका ग्रन्थाः विरचिताः। एतेषु ग्रन्थेषु खगोल-विद्यायाः गूढतत्त्वानां प्रतिपादनमस्ति। अनेन न केवलं खगोलतत्त्वानां निरूपणं कृतम् अपितु पृथिव्याः गोलकत्वं, गुरुत्वाकर्षणस्य सिद्धान्तः, पर्यावरणविज्ञानं, जलविज्ञानं, भूविज्ञानमपि विस्तरेण विवेचितम्। "पादपाः वल्मीकाश्च अधोभौमिकजलस्थितिं प्रदर्शयन्ति" इति तस्य कथनमासीत्। आधुनिकवैज्ञानिकाः अपि तदवलम्ब्य अन्वेषणं कुर्वन्ति।

नानादेशेषु परिभ्रमन् स्वकीयज्ञानदीप्त्या दीप्यमानः 587 (सप्ताशीत्यधिकं पञ्चशतम्) ख्रिस्ताब्दे सः दिवङ्गतः। स्वकीयविस्तृतज्ञानेन खगोलसदृशं गहनविषयमपि सरलं प्रस्तुतवान्। ज्यौतिषविद्यामहार्णवं तर्तुं तस्य ग्रन्थाः नौका इव सन्ति। सः महान् कालज्ञः आसीत्। ज्यौतिर्विद्यायां तु वराहमिहिरः तिमिरनाशकः सूर्य इव आसीत्।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| कालज्ञः | – ज्योतिषी | अजायत | – जन्म लिया, वल्मीकाः – दीमक |
| महार्णवम् | – महासागर को | गतानुगतिकताया: | – अन्धानुकरण |
| तिमिरनाशक: | – अन्धकार-विनाशक, | खगोल | – आकाशमण्डल |
| फलितज्यौतिषम् | – नक्षत्र ग्रहों के अनुसार फल बताने वाली विद्या | | |

## अभ्यासः

1. **एकपदेन उत्तरं लिखत—**

   क. वराहमिहिरस्य जन्म कुत्र अभवत्?

   ख. वराहमिहिरस्य पितुः नाम किम्?

   ग. वराहमिहिरः कस्मात् ज्यौतिषं पठितवान्?

   घ. वराहमिहिरः खगोलशास्त्रं कस्मात् पठितवान्?

   ङ. वराहमिहिरः अध्ययनं समाप्य कुत्र अगच्छत्?

2. **एकवाक्येन उत्तरं लिखत—**

   क. वराहमिहिरस्य जन्म कदा अभवत्?

   ख. वराहमिहिरः कदा दिवङ्गतः?

   ग. भारते फलितज्यौतिषस्य प्रथमः आचार्यः कः अभवत्?

   घ. वराहमिहिरेण के ग्रन्थाः विरचिताः?

   ङ. पादपाः वल्मीकाश्च किं प्रदर्शयन्ति?

3. **उचितशब्देन रिक्तस्थानं पूरयत—**

   क. वराहमिहिरः अध्ययनं समाप्य ...................... आगतः। (उज्जयिनीम्/पाटलिपुत्रनगरम्)

   ख. आर्यभटः ................ आसीत्। (खगोलशास्त्री/साहित्यशास्त्री)

   ग. बृहज्जातकं नाम ग्रन्थः .................. विरचितः। (आर्यभटेन/वराहमिहिरेण)

   घ. कपित्थग्रामः ..................... निकटे अस्ति। (पाटलिपुत्रनगरस्य/उज्जयिन्याः)

   ङ. गुरुत्वाकर्षणस्य सिद्धान्तः ............. विवेचितः। (आदित्यदासेन/वराहमिहिरेण)

4. **उचितं योजयत—**

| | (अ) | | (ब) |
|---|---|---|---|
| क. | उज्जयिन्याः निकटे | – | वराहमिहिरः |
| ख. | वराहमिहिरस्य जन्म | – | 587 ख्रिस्ताब्दे |
| ग. | आदित्यदासस्य पुत्रः | – | कपित्थग्रामः |
| घ. | अध्ययनं समाप्य वराहमिहिरः समागतः | – | 499 ख्रिस्ताब्दे |
| ङ. | वराहमिहिरस्य मृत्युः | – | उज्जयिनीम् |

### 5. शुद्धवाक्यानां समक्षम् 'आम्' अशुद्धवाक्यानां समक्षं 'न' इति लिखत—

क. "पञ्चसिद्धान्तिका" इत्यस्य ग्रन्थस्य रचयिता वराहमिहिरः अस्ति।

ख. बृहज्जातकं ग्रन्थस्य रचयिता आर्यभटः अस्ति।

ग. आर्यभटः खगोलशास्त्री आसीत्।

घ. वराहमिहिरस्य कृता कालगणना प्रामाणिकी अस्ति।

ङ. वराहमिहिरस्य जन्म वर्तमानमध्यप्रदेशराज्ये अभवत्।

### 6. नामोल्लेखपूर्वकं सन्धिविच्छेदं कुरुत—

क. आदित्योपासकः।

ख. अस्मिन्नेव।

ग. समाप्याध्ययनम्।

घ. बालकोऽजायत।

ङ. वर्द्धिताश्च।

च. खगोलशास्त्रस्याध्ययनम्।

### योग्यताविस्तारः —

- स्वशिक्षकस्य साहाय्येन उज्जयिन्यां वेधशालायाः अवलोकनं कुरुत।
- सूर्यात् दूरीक्रमेण ग्रहाणां नामानि लिखत।
- अन्यप्राचीनभारतीयवैज्ञानिकानाम् अध्ययनं कुरुत।
- निकटस्य तारामण्डलकेन्द्रस्य अवलोकनं कुरुत।

*ज्यौतिषं चाक्षुषं शास्त्रम्।*

## तृतीयः पाठः

# गणतन्त्रदिवसः

(विद्यालयस्य सभाकक्षे "वन्दे मातरम्" इति राष्ट्रियगीतस्य पूर्वाभ्यासः प्रचलति। तदवसरे शिक्षकः प्रविशति)



शिक्षकः – सुप्रभातम्! छात्राः! कथं चलति पूर्वाभ्यासः?

सर्वे – गुरवे नमः, सम्यक् प्रचलति। गणतन्त्र-दिवसार्थं राष्ट्रगानं राष्ट्रगीतं च ताल-लयबद्धम् अभ्यस्यामः।

शिक्षकः – उत्तमम्! देशभक्तिपराणि अन्यान्यगीतानि अपि प्रस्तोतुं प्रभवन्ति।

श्यामला – गुरो! भाषणार्थं भवतः मार्गदर्शनम् आवश्यकम्।

शिक्षकः – निस्सङ्कोचं पृच्छतु। यदहं जानामि तत्कथयामि।

ज्योत्स्ना – गणतन्त्रदिवसः स्वतन्त्रादिवस इव राष्ट्रियं-पर्व किल?

शिक्षकः – आम्, जनवरिमासस्य षड्विंशे दिनाङ्के (26 जनवरी) भारतीयाः वयं गणतन्त्रदिवसम् उत्साहेन आयोजयामः।

राजेशः – अस्मिन् पर्वणि दिल्लीनगरे स्थलसेना-जलसेना-वायुसेनानां पथचलनादिकम् अद्भुतं चित्ताकर्षकं च भवतीति श्रुतं मया।



सुहासिनी – गुरो! अत्र महोत्सवे वायुसेनायाः जेट्विमानानि उड्डयन्ते, वर्णरञ्जितधूमं च निस्सारयन्ति इति श्रुतं मया।

शिक्षकः – सत्यम्! गणतन्त्रदिवसे भारतस्य राष्ट्रपतिः स्थल-जल-वायुसेनानायकानाम् अभिवन्दनं स्वीकरोति

एवं विभिन्नराज्येषु तत्तद्राज्यपालाः प्रातिनिध्यं वहन्ति। विविधप्रान्तेभ्यः समागताः कलाकाराः सांस्कृतिककार्यक्रमैः जानपदनृत्यैः च जनमनांसि रञ्जयन्ति।



नरेशः – गुरो! गणतन्त्रम् इत्यस्य कोऽर्थः?

शिक्षकः – समुचितः प्रश्नः, भारतं स्वशासनाधारेण रचितानां राज्यानां गणरूपं वर्तते। राज्यस्तरे प्रादेशिकं शासनं, राष्ट्रियस्तरे गणतन्त्रम् एकरूपं प्रवर्तते।

श्यामला – गुरो! अस्य पर्वणः ऐतिहासिकं महत्त्वं ज्ञातुम् इच्छामि।

शिक्षकः – अहं विस्तरेण वदामि। परतन्त्रताकाले 31-12-1929 दिनाङ्कतः 01-01-1930 दिनाङ्कं यावत् तात्कालिक काङ्ग्रेससंस्थायाः लाहौरनगरे अधिवेशनम् अभवत्। तस्मिन् अधिवेशने 'सर्वैः राष्ट्रनायकैः सार्वभौमतन्त्रं रचयामः' इति प्रतिज्ञा कृता। लाहौराधिवेशने राष्ट्रभक्तैः त्रिवर्णध्वजारोहणम् अपि कृतम्। भारतीयानाम् अयं प्रतिज्ञास्वप्नः 1947 तमे वर्षे अगस्तमास्य पञ्चदश दिनाङ्के पूर्णतां गतः। देशः स्वतन्त्रः अभवत्। तदारभ्य प्रतिवर्षं 15 अगस्तदिने वयं स्वतन्त्रतादिवसम् आयोजयामः। अनन्तरं 26 जनवरी 1950 तमे वर्षे अस्माकं संविधानं प्रारब्धम् इति कारणतः प्रतिवर्षेऽस्मिन् दिने समग्रे राष्ट्रे वयं गणतन्त्रदिवसम् आचरामः।

सर्वे – धन्यवादाः, अस्माभिः स्वतन्त्रतादिवसस्य, गणतन्त्रदिवसस्य च महत्त्वं ज्ञातम्।

शिक्षकः – स्वस्ति! सर्वेभ्यः।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| सुप्रभातम् | — सुबह का नमस्कार | मार्गदर्शनम् | — निर्देश |
| ताल-लयबद्धम् | — गान की धुन से युक्त/ ताल और लय से युक्त | चित्ताकर्षकम् | — मन को आकर्षित करने वाला |
| अभ्यस्यामः | — हम अभ्यास करते हैं | भाषाधारेण | — भाषा के आधार से |
| देशभक्तिपराणि | — देशभक्ति से युक्त | त्रिवर्णध्वजारोहणम् | — तीन रंग के झण्डे का फहराना |
| प्रस्तोतुम् | — प्रस्तुत करने के लिए | | |

सार्वभौमतन्त्रम् — भारत की सम्पूर्ण भूमि पर अपना शासन

प्रतिज्ञास्वप्नः — प्रतिज्ञा रूपी स्वप्न

स्वस्ति — कल्याण हो

## अभ्यासः

**1. एकपदेन उत्तरं लिखत—**

क. कस्मिन् मासे गणतन्त्रदिवसः भवति?

ख. सेनानायकानाम् अभिवन्दनं कः स्वीकरोति?

ग. राज्येषु/राज्यराजधानीषु अभिवन्दनं के स्वीकुर्वन्ति?

घ. प्रथमं कस्मिन् अधिवेशने त्रिवर्णध्वजारोहणं कृतम्?

ङ. प्रतिज्ञास्वप्नः कस्मिन् वर्षे साक्षात्कृतः?

**2. एकवाक्येन उत्तरं लिखत—**

क. सभाकक्षे कस्य गीतस्य पूर्वाभ्यासः प्रचलति?

ख. भारतस्य राष्ट्रियपर्वणी के?

ग. कस्मिन् दिनाङ्के वयं स्वतन्त्रतादिवसम् आयोजयामः?

घ. राष्ट्रभक्तैः का प्रतिज्ञा कृता?

ङ. कलाकाराः किं कुर्वन्ति?

**3. प्रदत्तैः शब्दैः प्रश्ननिर्माणं कुरुत—**

(किं, कथं, कः, कैः, कुत्र)

यथा— जनवरिमासस्य षड्विंशे दिनाङ्के गणतन्त्रदिवसम् आचरामः।

जनवरिमासस्य कस्मिन् दिनाङ्के गणतन्त्रदिवसम् आचरामः?

क. गणतन्त्रदिवसः राष्ट्रियं पर्व वर्तते।

ख. भू-जल-वायुसेनानां प्रदर्शनं चित्ताकर्षकं भवति।

ग. दिल्लीनगरे राष्ट्रपतिः सेनानायकानाम् अभिवन्दनं स्वीकरोति।

घ. कलाकाराः नृत्यैः जनमनांसि रञ्जयन्ति।

ङ. लाहौराधिवेशने प्रथमवारं त्रिवर्णध्वजारोहणं जातम्।

## 4. रिक्तस्थानानि पूरयत—

(रञ्जयन्ति, सेनानायकानाम्, गणतन्त्रदिवसः, राज्यपालाः, स्वशासनाधारेण)

क. राष्ट्रपतिः ................. अभिवन्दनं स्वीकरोति।

ख. कलाकाराः जनमनांसि ................।

ग. जनवरिमासस्य षडविंशे दिनाङ्के .............. भवति।

घ. भारतं ................ रचितानां राज्यानां गणरूपं वर्तते।

ङ. राज्येषु ................ प्रातिनिध्यं वहन्ति।

## 5. उचितं योजयत—

| | (अ) | (ब) |
|---|---|---|
| क. | राज्यम् | जनगणमन-अधिनायक जय हे |
| ख. | कला | उड्डयन्ते |
| ग. | राष्ट्रियं गीतम् | राज्यपालः |
| घ. | विमानानि | कलाकारः |
| ङ. | राष्ट्रगानम् | वन्दे मातरम् |

## 6. विशेषणपदानि उपयुज्य दश वाक्यानि लिखत—

**मातरं वन्दे**

यथा— सुखदां मातरं वन्दे।

## 7. सन्धिम् अथवा सन्धिविच्छेदं कुरुत—

| | | |
|---|---|---|
| क. | स्वतन्त्रतादिवस इव | ....................। |
| ख. | निस्सारयन्तीति | ...................। |
| ग. | ..................... | इति + अस्य |
| घ. | सोऽयम् | ........................ |
| ङ. | अधुनावगतम् | ......................... |

## 8. अव्ययानि चित्वा लिखत—

क. कथं चलति पूर्वाभ्यासः?

ख. राष्ट्रगानं राष्ट्रगीतं च अभ्यसामः।

ग. अत्र महोत्सवे पथचलनं भवति।

घ. त्रिवर्णध्वजारोहणम् अपि कृतम्।

ङ. अधुना अवगतम् अस्माभिः।

**योग्यताविस्तारः —**

- आकाशवाणीद्वारा गणतन्त्रदिवसस्य प्रसारणं श्रुत्वा दूरदर्शनद्वारा दृष्ट्वा वा पञ्च वाक्यानि लिखत।
- चित्रं दृष्ट्वा पञ्चवाक्यैः मातृभूमेः वर्णनं कुरुत।




- विविधभाषासु राष्ट्रभक्तिगीतानि सङ्कलय्य तदवसरेताललयबद्धं गायत।
- दिनाङ्कानां संस्कृतशब्दरूपेण पठनार्थं लेखनार्थं च अभ्यासं कुरुत।

| | | | |
|---|---|---|---|
| उदाहरणम्— | 1929 | — | नवविंशत्यधिकनवदशशतकम्। |
| | 26 जनवरी | — | जनवरिमासस्य षड्विंशः दिनाङ्कः। |

***जयतु गणतन्त्रम्।***

## चतुर्थः पाठः

# नीतिश्लोकाः

J4K3X3

(नीतिश्लोकेषु नीतिः भवति। जीवनविषये, समाजविषये, राष्ट्रविषये धर्म-वैराग्य-संस्कार परोपकारादिविषये प्रामाणिकं, सुचिन्तितं वैज्ञानिकं च चिन्तनं नीतिश्लोकेषु लभ्यते। संस्कृते नीतिम् आश्रित्य श्लोकरचनायाः शतकरचनायाः च परम्परा अतिप्राचीना विद्यते। वस्तुतः अल्पैः शब्दैः महनीयभावानाम् उदात्तविचाराणां श्रेष्ठविषयाणां च महत्त्वपूर्णं विवरणं नीतिश्लोकेषु लभ्यते।)

अर्थागमोनित्यमरोगिता च प्रिया च भार्या प्रियवादिनी च।
वश्यश्च पुत्रोऽर्थकरी च विद्या षड् जीवलोकस्य सुखानि राजन्॥ 1॥

अयुक्तं स्वामिनो युक्तं युक्तं नीचस्य दूषणम्।
अमृतं राहवे मृत्युः विषं शङ्करभूषणम्॥ 2॥

अमृतं चैव मृत्युश्च द्वयं देहे प्रतिष्ठितम्।
मृत्युमापद्यते मोहात् सत्येनापद्यतेऽमृतम् ॥ 3॥

आपत्सु मित्रं जानीयाद् युद्धे शूरं धने शुचिम्॥
भार्यां क्षीणेषु वित्तेषु व्यसनेषु च बान्धवान्॥ 4॥

आरोप्यते शिला शैले यत्नेन महता यथा।
निपात्यते क्षणेनाधः तथात्मा गुणदोषयोः॥ 5॥

उद्योगे नास्ति दारिद्र्यं जपतो नास्ति पातकम्।
मौने च कलहो नास्ति नास्ति जागरिते भयम्॥ 6॥

किं छिद्रं को नु सङ्गो मे किं वास्त्यविनिपातितम्
कुतो ममाश्रयेद् दोषः इति नित्यं विचिन्तयेत्॥ 7॥

गुणेषु क्रियतां यत्नः किमाटोपैः प्रयोजनम्।
विक्रीयन्ते न घण्टाभिर्गावः क्षीरविवर्जिताः॥ 8॥

निर्धनस्य विषं भोगो निस्सत्त्वस्य विषं रणम्।
अनभ्यासे विषं शास्त्रम् अजीर्णे भोजनं विषम् ॥ 9॥

## शब्दार्था:

| | | |
|---|---|---|
| अर्थागम: | — | धन का आगम |
| अरोगिता | — | निरोगता |
| वश्य: | — | आज्ञापालक |
| अर्थकरी | — | धन संग्रह कराने वाली |
| अयुक्तम् | — | अनुचित, अयोग्य |
| स्वामिन: | — | समर्थ जन का |
| युक्तम् | — | उचित वस्तु या उपयोगी वस्तु |
| अमृतम् | — | अमृत, अमरता |
| मृत्युमापद्यते | — | मृत्यु को पाता है |
| आपत्सु | — | आपत्तियों में |
| व्यसनेषु | — | बुरी आदतों में |
| जानीयात् | — | जानना चाहिए |
| आरोप्यते | — | चढ़ाई जाती है |
| निपात्यते | — | गिराई जाती है |
| तथात्मा | — | वैसे ही प्राणी, व्यक्ति |
| अध: | — | नीचे |
| उद्योगे | — | उद्यम करने पर |
| दारिद्र्यम् | — | गरीबी |
| जपत: | — | भगवान् का नाम लेने वाले का |
| कलह: | — | लड़ाई-झगड़ा |
| छिद्रम् | — | दुर्बलता, गलती, बुराई |
| सङ्ग: | — | आसक्ति |
| अविनिपातितम् | — | वह कौन सी वस्तु जो पतनशील नहीं है |
| ममाश्रयेत् | — | मुझ में आते हैं |
| विचिन्तयेत् | — | चिन्तन करना चाहिए |
| गुणेषु | — | गुण के उपार्जन में |
| किमाटोपै: | — | बाहरी आडम्बरों से क्या? |
| घण्टाभि: | — | घण्टे लटकाने से |
| क्षीरविवर्जिता: | — | दूध से रहित |
| भोग: | — | भोग-विलास |
| निस्सत्वस्य | — | अशक्त के लिए |
| अनभ्यासे | — | अभ्यास न करने पर |
| अजीर्णे | — | अपच में |

## अभ्यास:

1. **एकपदेन उत्तरं लिखत—**

क. भार्या कीदृशी भवेत्?

ख. विद्या कीदृशी भवेत्?

ग. युक्तं नीचस्य किं भवति?

घ. मनुष्य: मृत्युं कथम् आपद्यते?

ङ. मित्रं कदा जानीयात्?

**2. एकवाक्येन उत्तरं लिखत—**

क. अजीर्णे विषं किम्?

ख. दारिद्र्यं कुत्र नास्ति?

ग. मानवः नित्यं किं विचिन्तयेत्?

घ. गुणेषु कः करणीयः?

ङ. अनभ्यासे किं विषम्?

**3. श्लोकांशान् यथायोग्यं योजयत—**

| | (अ) | (ब) |
|---|---|---|
| क. | मृत्युमापद्यते मोहात् | विषं शङ्करभूषणम् |
| ख. | गुणेषु क्रियतां यत्नः | सत्येनापद्यतेऽमृतम् |
| ग. | अनभ्यासे विषं शास्त्रम् | जपतो नास्ति पातकम् |
| घ. | अमृतं राहवे मृत्युः | किमाटोपैः प्रयोजनम् |
| ङ. | उद्योगे नास्ति दारिद्र्यं | अजीर्णे भोजनं विषम् |

**4. शुद्धवाक्यानां समक्षम् 'आम्' अशुद्धवाक्यानां समक्षं 'न' इति लिखत—**

क. नित्यम् अर्थागमः अरोगिता च इति द्वयं भवेत्। [ ]

ख. अमृतं विषं च द्वयं देहे प्रतिष्ठितम्। [ ]

ग. उद्योगे दारिद्र्यम् अस्ति। [ ]

घ. व्यसनेषु बान्धवान् जानीयात्। [ ]

ङ. सत्येन अमृतम् आपद्यते। [ ]

## 5. पदानां विभक्तिं वचनं च लिखत—

| | पदम् | शब्दः | विभक्तिः | वचनम् |
|---|---|---|---|---|
| क. | नीचस्य | नीचः | षष्ठी | एकवचनम् |
| ख. | आपत्सु | ............... | ............... | ............... |
| ग. | युद्धे | ............... | ............... | ............... |
| घ. | क्षीणेषु | ............... | ............... | ............... |
| ङ | धने | ............... | ............... | ............... |
| च. | गुणदोषयोः | ............... | ............... | ............... |
| छ. | निर्धनस्य | ............... | ............... | ............... |
| ज. | मौने | ............... | ............... | ............... |
| झ. | व्यसनेषु | ............... | ............... | ............... |
| ञ. | बान्धवान् | ............... | ............... | ............... |

### योग्यताविस्तारः —

- अन्यौ कौ अपि द्वौ नीतिश्लोकौ लिखत जानत च।

*नयेन जेतुं जगती सुयोधनः।*

पञ्चमः पाठः

# अहम् ओरछा अस्मि

D5H1F7

अहम् ओरछा! अहं निवाड़ीमण्डले स्थितं प्राचीनं नगरम् अस्मि। पूर्वं स्वतन्त्रराज्यरूपेण मम परिचयः आसीत्। मम स्थापना षोडशशताब्दे बुन्देलाराजपूतेन रुद्रप्रतापेन कृता। माम् परितः सघनं वनम् अस्ति। अस्मिन् वने सागौनवृक्षाः अधिकाः भवन्ति। सागौनकाष्ठं बहुमूल्यं भवति। मम वने सिंहाः, व्याघ्राः, हरिणाः, नीलगावः, वानराः स्वच्छन्दं विचरन्ति। अन्येऽपि वन्यपशवः निर्भयाः वसन्ति। एतेषां वन्यपशूनां रक्षणाय शासनेन इदानीम् अभयारण्यं निर्मितम्। मम परिक्षेत्रे चतस्रः प्रमुखाः नद्यः प्रवहन्ति। धसान-जामिनी-जतारा-बेतवा नाम्न्यः नद्यः जलस्य आवश्यकतां पूरयन्ति, कृषिं, वनं, भूमिं च सिञ्चन्ति। जामिनीनद्याः तीरे जम्बुवृक्षाः अधिकाः भवन्ति। मम दक्षिणभागे जामिनीवेत्रवत्योः सङ्गमः अस्ति। तत्र सङ्गमात् जलस्य सप्तधाराः भवन्ति। अत एव जनाः लोकभाषायां तं स्थलं 'सप्तधारा' इति वदन्ति। वेत्रवत्याः तटे मम पुरातनः ऐतिहासिकः दुर्गः अस्ति। बहूनि मन्दिराणि अपि सन्ति। तत्रैव राज्ञां समाधयः अपि सन्ति। तटे एकं भव्यं रामराजामन्दिरं विद्यते। एतद् कलात्मकम् ऐतिहासिकं च मन्दिरम् अस्ति। मन्दिरे रामस्य, लक्ष्मणस्य, सीतायाश्च भव्याः, मनोरमाः प्रतिमाः प्रतिष्ठिताः। मन्दिरस्य उद्याने विषपानस्थलं वर्तते। अत्रैव वीरः हरदौलः विषपानं कृतवान्। मम भूमौ अनेके वीराः, धीराः, श्रेष्ठाः पुरुषाः अभवन्। तेषु हरदौलः मम अतिप्रियः आसीत्। सः राज्ञः जुझारसिंहस्य प्रियः अनुजः आसीत्। परं चाटुकारैः, धूर्तैः राज्ञः मनसि राज्ञीहरदौलसम्बन्धे सन्देहः उत्पादितः। हरदौलः महाराज्ञ्याः सम्मानरक्षणाय राज्ञः सन्देहनिवारणाय च विषपानं कृतवान्। अद्यापि तस्य बलिदानस्य स्मृतिः समस्ते क्षेत्रे सजीवा इव भाति। विवाहावसरे महिलाः तं प्रथमं पूजयन्ति।



मम दुर्गम् अपि सुदृढं कलात्मकं चास्ति। दरबारभवनम्, शीशभवनञ्च दुर्गस्य वैशिष्ट्यम् अस्ति। सर्वेषु भवनेषु स्थापत्यकलायाः सुन्दराणि चित्राणि मनांसि रञ्जयन्ति। भवनानां गवाक्षेषु अपि प्रस्तरपट्टिकासु सूक्ष्मं शिल्पकार्यं विद्यते। भित्तिकासु अपि मनोहराणि चित्राणि वर्तन्ते। दुर्गस्य अधस्तले काव्यकलाविदग्धायाः नर्तक्याः रायप्रवीणायाः आकर्षकं भवनमपि स्थितम्। वामे दर्शनीयं चतुर्भुजमन्दिरं विद्यते। अत्रापि प्रस्तरेषु कलायाः चित्रणम् अद्भुतं भाति। पुरतः सावन-भादौनामकौ स्तम्भौ प्रसिद्धौ।

ममपरिसरे एकं पुष्पोद्यानं वर्तते। तत्र विविधवर्णानि पुष्पाणि पर्यटकानां चित्तं मोदयन्ति। उद्यानस्य नातिदूरे हिन्दीभाषाया: प्रसिद्धकवे: केशवदासस्य स्थानमस्ति। षोडशशताब्दात् आरभ्य मम निर्माणम् अद्यावधि चलति एव। परं सर्वाधिकं निर्माणकार्यं महाराजवीरसिंहप्रथमस्य शासने अभवत्। मम इतिहास: रोचक:, कुतूहलपूर्ण: च अस्ति। मध्यकाले मम विशिष्टं स्थानं महत्त्वञ्च आसीत्। अधुनाऽपि रामराजा तथैव विराजते। इदानीमपि जना: प्रतिवर्षम् आगच्छन्ति माम् दृष्ट्वा च मुदिता: भवन्ति। अन्यानि अपि लक्ष्मीनारायणमन्दिर-फूलबाग-दीवान-हरदौलभवन-सुन्दरभवन-शहीदस्मारक प्रभृतीनि द्रष्टव्यानि स्थलानि सन्ति। प्रतिदिनं यात्रिण: आगत्य ममैतिहासिकं स्वरूपं दृष्ट्वा प्रसन्ना: भवन्ति तथा च तान् विलोक्य अहमपि प्रसन्न: भवामि।

## शब्दार्था:

| | | | |
|---|---|---|---|
| परित: | — चारों ओर | वन्यपशव: | — जंगली पशु, विदग्धाया: — निपुण |
| गवाक्षेषु | — खिड़कियों में | दुर्ग: | — किला |
| सङ्गम: | — नदियों के पारस्परिक मिलन स्थल | भाति | — सुशोभित होता है |

## अभ्यास:

**1. एकपदेन उत्तरं लिखत—**

क. ओरछानगरं कस्मिन् मण्डले अस्ति?

ख. ओरछानगरस्य स्थापना कदा अभवत्?

ग. ओरछानगरस्य स्थापना केन कृता?

घ. विषपानस्थलं कुत्र वर्तते?

ङ. विषपानं क: कृतवान्?

च. ओरछानगरं परित: किम्?

**2. एकवाक्येन उत्तरं लिखत—**

क. ओरछानगस्य परिक्षेत्रस्य प्रमुखनदीनां नामानि लिखत?

ख. दुर्गस्य किं वैशिष्ट्यम्?

ग. भवनानां गवाक्षेषु किं विद्यते?

घ. हरदौलमहाराज: किमर्थं विषपानं कृतवान्?

ङ. प्रसिद्धकवे: केशवदासस्य स्थानं कुत्र अस्ति?

च. ओरछानगरे कानि द्रष्टव्यानि स्थलानि सन्ति?

**3. उचितं मेलयत—**

| | (अ) | (ब) |
|---|---|---|
| क. | ओरछानगरस्य परिक्षेत्रे | तं प्रथमं पूजयन्ति |
| ख. | विवाहावसरे महिला: | अद्भुतं भाति |
| ग. | प्रस्तरेषु कलाया: चित्रणम् | चतस्र: नद्य: सन्ति |
| घ. | जुझारसिंहस्य प्रिय: अनुज: | महाराजवीरसिंहप्रथमस्य शासने अभवत् |
| ङ. | सर्वाधिकं निर्माणकार्यं | हरदौल: आसीत् |

4. **उचितपदेन रिक्तस्थानं पूरयत—**

क. विषपानस्थलं ...................... वर्तते। (उद्यानस्य मध्ये/मन्दिरस्य प्राङ्गणे)

ख. दरबारभवनं ...................... अस्ति। (दुर्गे/मार्गे)

ग. केशवदासः ............... कविः आसीत्। (संस्कृतभाषायाः/हिन्दीभाषायाः)

घ. ओरछानगरस्य इतिहासः .............. अस्ति। (मोचकः/रोचकः)

ङ. जामिनीनद्याः तीरे .............. अधिकाः भवन्ति। (दाडिमवृक्षाः/जम्बुवृक्षाः)

5. **नामोल्लेखपूर्वकं समासविग्रहं कुरुत—**

क. शिल्पकार्यम्

ख. काव्यकलाविदग्धायाः

ग. विषपानस्थलम्

घ. विवाहावसरे

ङ. चतुर्भुजमन्दिरम्

6. **नामोल्लेखपूर्वकं सन्धिविच्छेदं कुरुत—**

क. अत्रैव

ख. महत्त्वञ्च

ग. अद्यावधि

घ. सर्वाधिकम्

ङ. भवनमपि

7. **समीचीनं चिनुत (आम्/न)—**

क. ओरछानगरस्य दुर्गः सुदृढः कलात्मकः च नास्ति। [ ]

ख. अभयारण्यं वन्यपशूनां रक्षणाय भवति। [ ]

ग. ओरछानगरे भित्तिकासु मनोहराणि चित्राणि वर्तन्ते। [ ]

घ. ओरछानगरस्य निकटे सप्तधाराः सन्ति। [ ]

ङ रामराजामन्दिरे परशुरामस्य प्रतिमा अस्ति। [ ]

**योग्यताविस्तारः —**

- अन्येषाम् ऐतिहासिकस्थलानाम् अवलोकनं कुरुत।
- मानचित्रे मध्यप्रदेशे ओरछानगरस्य स्थितिं प्रदर्शयत।

*रामो राजते यत्र तद्धाम परमं मम।*

षष्ठः पाठः

# स्वामी विवेकानन्दः

G4M8L6



'बहुजन हिताय, बहुजन सुखाय' इत्यस्मिन् कार्ये संलग्नस्य स्वामिविवेकानन्दस्य बाल्यकालस्य नाम 'नरेन्द्रनाथः' आसीत्। तस्य जन्म जनवरिमासस्य द्वादशे दिनाङ्के 1863 ख्रिस्ताब्दे (12 जनवरी, 1863) कोलकातानगरे अभवत्। तस्य मातुः नाम 'भुवनेश्वरीदेवी' आसीत्। तस्य पिता विश्वनाथदत्तः लब्धप्रतिष्ठः अभिभाषकः आसीत्। नरेन्द्रनाथः बाल्यकालादेव संस्कृतानुरागी, कुशाग्रबुद्धिः, मल्लविद्यादिषु क्रीड़ासु पारङ्गतः धार्मिकश्चासीत्।

तस्मिन् काले रामकृष्णपरमहंसः अद्वितीयाध्यात्मिकज्ञानपुञ्जस्य स्रोतः आसीत्। तस्य प्रभावेण प्रभावितः नरेन्द्रनाथः तस्मादेव परिव्राजकदीक्षां प्राप्नोत्। दीक्षानन्तरं सः स्वामी विवेकानन्दः इति नाम्ना प्रसिद्धोऽभवत्। ततः सः स्वकीयज्ञानदीप्त्या सदुपदेशैः जनान् अध्यात्मपरायणमकरोत्। तस्यावधारणा आसीत् यत् प्रेम्णा, सत्येन, पराक्रमेण च कार्याणि सिद्ध्यन्ति। तत्कुरु पौरुषम्। आत्मभावस्य विकासः एव कर्म। अनात्मभावस्य विकासः एवाकर्म। दौर्बल्येन किमपि न भवति। अतः सबलो भव।

जीवनस्यार्थः उन्नतिरस्ति। उन्नतेः तात्पर्यं हृदयस्यौदार्यमस्ति। परोपकारः एव जीवनगतिः। स्वार्थभावः एव मृत्युः। प्रेमभावः एव जीवनम्। द्वेषभावः एव मृत्युः। प्रेमभावः एव भक्तिः, ज्ञानं मुक्तिश्चास्ति। प्रेम विना नेदं यदिदमुपासते।

सर्वथा दरिद्रनारायणो सेवितव्यः। यतोहि बुभुक्षितः, दीनः, उपेक्षितः, दिव्याङ्गजनः, दुर्बलः एव साक्षादीश्वरः। अतः एतेषामुपासना एव ईश्वरस्याराधना अस्ति।

चारित्र्यबलं धारयत। अनेनैव सर्वत्र विजयो भविष्यति। दाता भव। प्रतिग्रहणस्य कामनां मा कुरु। वसन्तवल्लोकहितं चरत। परोपकारः परमपवित्रं कार्यमस्ति। परोपकारेण चित्तं शुद्ध्यति। अनेनैव ईश्वरप्राप्तिः सम्भवा।

सः वेदान्तप्रचाराय स्वकीयाखिलं जीवनं समर्पयामास। तेन हिन्दुधर्मः संस्कृतिश्च प्रसारिते। सः न केवलं परिव्राजकः, अपितु परोपकारी, दाता, लोकसेवकः महान् देशभक्तश्चासीत्। शिकागोनगरे विश्वधर्मसम्मेलने सः भारतस्य प्रतिनिधिः अभवत्। देशविदेशेषु तस्य बहवः शिष्याः अभवन्। आङ्ग्लदेशीया "कुमारी नोबल" या अनन्तरं 'भगिनी निवेदिता' इति नाम्ना प्रसिद्धा, तस्य प्रिया शिष्या

अभवत्। सः यूनां कृते विशिष्टप्रेरकः पथप्रदर्शकश्चासीत्। भारतीयस्वतन्त्रतासङ्ग्रामेऽपि तस्य ऊर्जस्वलानि भाषणानि स्वाधीनतासैनिकानां कृते प्रेरणास्पदानि। 'उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत' इत्युपनिषदः ध्येयवाक्यं सः जीवनेऽधारयत्।

अहर्निशं ब्रह्मकर्मसाधनां साध्यमानः एव जुलाई मासस्य चतुर्थे दिनाङ्के 1902 ख्रिस्ताब्दे (4 जुलाई, 1902) सः ब्रह्मलीनो जातः। सः न केवलं भारते अपितु, विदेशेष्वपि प्रसिद्धः। तेन भारतस्य प्राचीनगौरवं विदेशेषु स्थापितम्। रवीन्द्रनाथटैगोरः कथयति यत् यदि कोऽपि भारतीयसंस्कृतिं ज्ञातुमिच्छति तर्हि प्रथमः तेन स्वामीविवेकानन्दविषये पठितव्यम्।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| लब्धप्रतिष्ठः | – ख्याति प्राप्त | बुभुक्षिताः | – भूखे |
| अभिभाषकः | – वकील | औदार्यम् | – उदारता का गुण |
| कुशाग्रबुद्धिः | – तीव्र बुद्धि | प्रतिग्रहणस्य | – दान के बदले ग्रहण करने की/का |
| परिव्राजकदीक्षाम् | – संन्यास की दीक्षा को | ऊर्जस्वलानि | – तेजस्वी |
| स्वकीयज्ञानदीप्त्या | – अपने ज्ञान के प्रकाश से | ब्रह्मलीनः | – ब्रह्म में लीन |
| मल्लविद्यादिषु | – कुश्ती आदि विद्याओं में | वसन्तवल्लोकहितं | – वसन्त के समान लोक कल्याणकारी |
| अध्यात्मपरायणम् | – अध्यात्म की ओर अभिमुख | | |
| प्राप्य वरान्निबोधत | – श्रेयस्कर लक्ष्य को प्राप्त कर शांत हो | | |

## व्याकरणम्

| | | | | | | |
|---|---|---|---|---|---|---|
| धार्मिकश्चासीत् | = | धार्मिकः | + च | + | आसीत्। |
| अध्यात्मपरायणमकरोत् | = | अध्यात्मपरायणम् | + अकरोत्। | | |
| हृदयस्यौदार्यमस्ति | = | हृदयस्य | + औदार्यम् | + | अस्ति। |
| मुक्तिश्चास्ति | = | मुक्तिः | + च | + | अस्ति। |
| यदिदमुपासते | = | यत् | + इदम् | + | उपासते। |
| वसन्तवल्लोकहितम् | = | वसन्तवत् | + लोकहितम्। | | |

## अभ्यासः

1. **एकपदेन उत्तरं लिखत –**

   क. स्वामिविवेकानन्दस्य बाल्यकालस्य नाम किम् आसीत्?

   ख. स्वामिविवेकानन्दस्य मातुः नाम किम् आसीत्?

ग. नरेन्द्रनाथस्य पितुः नाम किम् आसीत्?

घ. नरेन्द्रनाथस्य जन्म कस्मिन् नगरे अभवत्?

ङ. नरेन्द्रनाथस्य गुरोः नाम किम् आसीत्?

## 2. एकवाक्येन उत्तरं लिखत –

क. नरेन्द्रनाथस्य जन्म कदा अभवत्?

ख. शिकागोनगरे विश्वधर्मसम्मेलने भारतस्य प्रतिनिधिः कः अभवत्?

ग. स्वामी विवेकानन्दः कदा ब्रह्मलीनोऽभवत्?

घ. रवीन्द्रनाथटैगोरस्य किं कथनम् अस्ति?

ङ. यूनां प्रेरकः पथप्रदर्शकश्च कः?

## 3. उचितं योजयत –

| | (अ) | (ब) |
|---|---|---|
| क. | नरेन्द्रनाथः एव | विश्वनाथदत्तः |
| ख. | नरेन्द्रनाथस्य माता | स्वामी विवेकानन्दः |
| ग. | नरेन्द्रनाथस्य पिता | रामकृष्णपरमहंसः |
| घ. | नरेन्द्रनाथस्य गुरुः | भगिनी निवेदिता |
| ङ. | नरेन्द्रनाथस्य प्रिया शिष्या | भुवनेश्वरीदेवी |

## 4. शुद्धवाक्यानां समक्षम् 'आम्' अशुद्धवाक्यानां समक्षं 'न' इति लिखत—

क. पौरुषं कुरु। [ ]

ख. आत्मभावस्य विकासः एव कर्म। [ ]

ग. जीवनस्यार्थः उन्नतिः नास्ति। [ ]

घ. स्वार्थभावः एव मृत्युः। [ ]

ङ. परोपकारः अपवित्रं कार्यमस्ति। [ ]

## 5. उचितपदेन रिक्तस्थानं पूरयत –

क. प्रतिग्रहणस्य कामनां ......................। (कुरु / मा कुरु)

ख. चारित्र्यबलं .....................। (वारयत / धारयत)

ग. नरेन्द्रनाथस्य पिता ....................आसीत्। (भाषकः / अभिभाषकः)

घ. अनात्मभावस्य विकासः एव ....................। (कर्म / अकर्म)

ङ स्वामिविवेकानन्दस्य जन्म .................... अभवत्। (कोलकातानगरे / मुम्बईनगरे )

6. **नामोल्लेखपूर्वकं सन्धिविच्छेदं कुरुत –**

क. दीक्षानन्तरम्।

ख. प्रसिद्धोऽभवत्।

ग. एवाकर्म।

घ. तस्यावधारणा।

ङ अनेनैव।

च. कार्यमस्ति।

7. **नामोल्लेखपूर्वकं समासविग्रहं कुरुत –**

क. लोकसेवकः।

ख. परोपकारः।

ग. परिव्राजकदीक्षाम्।

घ. जीवनगतिः।

ङ. ईश्वरप्राप्तिः।

8. **मूलशब्दं लिङ्गं विभक्तिं वचनं च लिखत –**

क. ज्ञानम्

ख. कार्यम्

ग. अनेन

घ. ईश्वरः

ङ दीनः

च. क्रीडासु

छ. एतेषाम्

ज. सः

9. **अव्ययानां वाक्यप्रयोगं कुरुत —**

च, एवम्, मा, तदा, यदि।

10. **'स्वामी विवेकानन्दः' इति विषयमवलम्ब्य संस्कृते दशवाक्यानि लिखत।**

**योग्यताविस्तारः –**

- स्वामिविवेकानन्दस्य साहित्यं पठत।
- रामकृष्णमिशनविषये जानत।
- स्वामिविवेकानन्दस्योपदेशान् जीवने दधत।

*इदं राष्ट्राय इदं न मम।*

## सप्तमः पाठः

# ऐक्यबलम्

L2X5Y6

कस्मिंश्चित् वने निम्बवृक्षे एकं चटकायुगलं प्रतिवसति स्म। समये चटकया अण्डानि दत्तानि, युगलम् अति प्रसन्नम् आसीत्। एकस्मिन् दिने आतपपीड़ितः एकः मदमत्तः गजः तत्र आगतः। मदेन सः तस्य वृक्षस्य तां शाखां नाशितवान् यस्यां शाखायां चटकायाः अण्डानि आसन्। अतः अण्डानि अपि नष्टानि। चटकायुगलं कातरक्रन्दनम् आरब्धवत्। रोदनं श्रुत्वा तयोः मित्रं काष्ठभेदकः पक्षी आगतः। सः उक्तवान्— रोदनेन अलम्। तेन उक्तं "सः एव बुद्धिमान् यः मृतं गतं च न चिन्तयति।" चटका तम् अवदत्, "एषः मत्तगजः हन्तव्यः अन्यथा एषः सर्वान् पशुपक्षिपादपान् नाशयिष्यति।" काष्ठभेदकः अवदत्-अहं स्वमित्रं मक्षिकाम् आनयामि कदाचित् सा गजं हन्तुम् उपायं चिन्तयेत्।

सः गत्वा मक्षिकां न्यवेदयत् यत्-मम चटकामित्रस्य गृहम् एकेन मत्तगजेन विनष्टम्। तस्य वधाय सहायतां करोतु। मक्षिका अवदत्- "यत् मित्रम् एव मित्रस्य कार्यं साधयति। मक्षिका तदा स्वमित्रं चतुरमण्डूकम् उपायं पृष्टवती। मण्डूकः उक्तवान्- एकीभूता दुर्बलाः अपि सबलं शत्रुं हन्तुं शक्नुवन्ति। तैः सर्वैः मिलित्वा एका योजना निश्चिता। सर्वेषां दायित्वं वितरितं तदनुसारं मध्याह्ने मक्षिकया गजस्य कर्णयोः वीणावादनं कृतम्। एतेन गजः नयने निमील्य वीणावादनेन मुग्धः अभवत्। तावत् एव काष्ठभेदकः तस्य नयने चञ्चुप्रहारेण व्यनाशयत्। अनन्तरं यत्र महान् पङ्कः आसीत् तत्र मण्डूकः ध्वनिना तं जलं पातुम् आकर्षितवान्। अन्धः गजः तस्मिन् पङ्के पतितः मृतश्च।



एवं तैः तीक्ष्णबुद्ध्या ऐक्येन च सः मत्तगजः मारितः। आत्मनो वनस्य च रक्षणं कृतम्।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| आतपपीडितः | — धूप से दुःखित | कातरक्रन्दनम् | — करुण रोदन |
| निम्बवृक्षे | — नीम के पेड़ पर | मक्षिका | — मक्खी |
| चटकायुगलम् | — चिड़ियों का जोड़ा (नर-मादा) | एकीभूताः | — एकत्र होकर |
| | | सबलम् | — बलशाली को |
| काष्ठभेदकः | — कठफोड़वा नाम का पक्षी | निमील्य | — बन्दकर |
| मत्तगजः | — मतवाला हाथी | तीक्ष्णबुद्ध्या | — तेज बुद्धि के द्वारा |
| चतुरमण्डूकम् | — होशियार मेंढक से/को | वीणावादनेन मुग्धः | — वीणा वादन से मोहित हुआ |

## अभ्यासः

### 1. एकपदेन उत्तरं लिखत—

क. चटकायुगलं कुत्र प्रतिवसति स्म?

ख. गजः कां नाशितवान्?

ग. चटकायुगलस्य रोदनं श्रुत्वा कः आगतः?

घ. काष्ठभेदकः काम् आनीतवान्?

ङ जलं पातुं गजं कः आकर्षितवान्?

### 2. एकवाक्येन उत्तरं लिखत—

क. बुद्धिमान् कः अस्ति?

ख. मित्रस्य कार्यं कः साधयति?

ग. मण्डूकः मक्षिकां किम् उपायम् उक्तवान्?

घ. मक्षिका गजस्य कर्णयोः किं कृतवती?

ङ ते मत्तगजं केन बलेन मारितः?

### 3. युग्मनिर्माणं कुरुत—

| | (अ) | | (ब) |
|---|---|---|---|
| क. | ऐक्यबलेन | — | चञ्चुप्रहारम् |
| ख. | बुद्धिमान् | — | वीणावादनम् |
| ग. | काष्ठभेदकः | — | कातरक्रन्दनम् |
| घ. | मक्षिका | — | मत्तगजः मारितः |
| ङ. | चटकायुगलम् | — | यः गतं मृतं च न चिन्तयति |

**4. रिक्तस्थानानि पूरयत—**

क. निम्बवृक्षे एकं ............... प्रतिवसति स्म।

ख. चटकायुगलं .................... आरब्धवत्।

ग. मक्षिका स्वमित्रम् ................ पृष्टवती।

घ. मत्तगजः ................ पतितः।

ङ ते ................ मत्तगजं मारितवन्तः

**5. एकताविषये पञ्चवाक्यानि लिखत—**

क. .......................................।

ख. .......................................।

ग. ........................................।

घ. .......................................।

ङ .......................................।

**6. पाठे आगतानां जीवानां नामानि परस्परं सम्बन्धं च लिखत—**

............................................................................................................

............................................................................................................

............................................................................................................

............................................................................................................

............................................................................................................

**योग्यताविस्तारः —**

- एवमेव कामपि एकां कथां लिखत।

*संहतिः कार्यसाधिका।*

# विविधप्रश्नावलिः – 1

L7D6S6

1. **प्रश्नानाम् एकपदेन उत्तरं लिखत—**

क. मनसा किं करणीयम्?

ख. वराहमिहिरस्य पितुः नाम किम्?

ग. कस्मिन् मासे गणतन्त्रदिवसः भवति?

घ. विद्या कीदृशी भवेत्?

ङ. ओरछानगरस्य स्थापना केन कृता?

च. नरेन्द्रनाथस्य पितुः नाम किम् आसीत्?

छ. गजः कां नाशितवान्?

ज. मित्रं कदा जानीयात्?

2. **प्रश्नानाम् एकवाक्येन उत्तरं लिखत—**

क. कुत्र चरणीयम्?

ख. वराहमिहिरेण के ग्रन्थाः विरचिताः।

ग. राष्ट्रभक्तैः का प्रतिज्ञा कृता?

घ. अनभ्यासे किं विषम्?

ङ. हरदौलमहाराजः किमर्थं विषपानं कृतवान्?

च. शिकागोनगरे विश्वधर्मसम्मेलने भारतस्य प्रतिनिधिः कः अभवत्?

छ. मण्डूकः मक्षिकां किम् उपायम् उक्तवान्?

3. **कोष्ठकात् उचितानि पदानि चित्वा रिक्तस्थानानि पूरयत—**

क. वराहमिहिरः अध्ययनं समाप्य ............ आगतः। (उज्जयिनीम्/पाटलिपुत्रनगरम्)

ख. प्रतिग्रहणस्य कामनां .......................। (कुरु/मा कुरु)

ग. उद्योगे ................. दारिद्र्यम्। (अस्ति/नास्ति)

घ. केशवदासः ................ कविः आसीत्। (संस्कृतभाषायाः/हिन्दीभाषायाः)

ङ. राज्येषु ................. प्रातिनिध्यं वहन्ति। (भोपालम्/राज्यपालाः)

च. लोकहितं .......................। (वदनीयम्/करणीयम्)

छ. मत्तगजः ................ पतितः। (अङ्के/पङ्के)

**4. अधोलिखितपदानां विलोमानि लिखत—**

क. सततम्   ख. तिमिरः

ग. उत्कर्षस्य   घ. अमृतम्

ङ. गुणेषु   च. मित्रम्

**5. पदानां समानार्थकं पदानि लिखत—**

क. बुद्धिः   ख. मार्गदर्शनम्

ग. पुष्पाणि   घ. वीरः

ङ. नृपः   च. महार्णवम्

**6. नामोल्लेखपूर्वकं सन्धिविच्छेदं कुरुत—**

क. बालकोऽजायत

ख. वर्द्धिताश्च

ग. अत्रैव

घ. अद्यावधि

ङ. एवाकर्म

**7. नामोल्लेखपूर्वकं समासविग्रहं कुरुत—**

क. परोपकारः   ख. पर्यावरणविज्ञानम्

ग. धनाभावेन   घ. क्षीरविवर्जिताः

ङ. शिल्पकार्यम्   च. गणतन्त्रदिवसः

**8. उचितं मेलयत—**

| | (अ) | (ब) |
|---|---|---|
| क. | ऐक्यबलेन | वन्दे मातरम् |
| ख. | राष्ट्रियं गीतम् | वराहमिहिरः |
| ग. | राष्ट्रगानम् | किमाटोपैः प्रयोजनम् |
| घ. | आदित्यदासस्य पुत्रः | जनगणमन–अधिनायक जय हे |
| ङ. | गुणेषु क्रियतां यत्नः | मत्तगजः मारितः |

**9. धातुरूपाणां समक्षं धातु-लकार-पुरुष-वचनानि च लिखत—**

| | धातुरूपम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| क. | अस्ति | | | | |
| ख. | कुर्वन्ति | | | | |
| ग. | आसन् | | | | |
| घ. | वर्तते | | | | |
| ङ. | भवन्ति | | | | |
| च. | विद्यते | | | | |

**10. शब्दरूपाणां समक्षं मूलशब्द-विभक्ति-लिङ्ग-वचनानि च लिखत—**

| | शब्दरूपम् | मूलशब्दः | विभक्तिः | लिङ्गम् | वचनम् |
|---|---|---|---|---|---|
| क. | ज्ञानम् | | | | |
| ख. | बालकः | | | | |
| ग. | तस्मिन् | | | | |
| घ. | वने | | | | |
| ङ. | घण्टाभिः | | | | |
| च. | जलस्य | | | | |

**11. अधोलिखितगद्यांशं पठित्वा उत्तराणि लिखत—**

मम परिसरे एकं पुष्पोद्यानं वर्तते। तत्र विविधवर्णानि पुष्पाणि पर्यटकानां चित्तं मोदयन्ते। उद्यानस्य नातिदूरे हिन्दीभाषायाः प्रसिद्धकवेः केशवदासस्य स्थानमस्ति। षोडशशताब्दात् आरभ्य मम निर्माणम् अद्यावधि चलति एव। परं सर्वाधिकं निर्माणकार्यं महाराजवीरसिंहप्रथमस्य शासने अभवत्।

क. मम परिसरे किं वर्तते?

ख. पर्यटकानां चित्तं कानि मोदयन्ते?

ग. सर्वाधिकं निर्माणकार्यं कस्य शासने अभवत्?

घ. केशवदासः कस्याः भाषायाः कविः आसीत्?

**अथवा**

अस्ति उज्जयिन्याः निकटे 'कपित्थ' (कायथा) नामाख्यो ग्रामः। तत्र आदित्योपासकः 'आदित्यदासः' नामा कश्चित् विप्रः प्रतिवसति स्म। तस्य गृहे 'वराहमिहिरः' नामा बालकोऽजायत। वराहमिहिरस्य जन्म 499 (नवनवत्यधिक चतुश्शतके) ख्रिस्ताब्दे सञ्जातम्।

बालकः वराहमिहिरः स्वकीयपित्रा एव ज्यौतिषविद्यामध्यगच्छत्। ततः सः पाटलिपुत्रनगरं गत्वा प्रसिद्धखगोलशास्त्रज्ञात् आर्यभटात् खगोलशास्त्रस्याध्ययनं कृतवान्।

क. 'कपित्थ' नामाख्यो ग्रामः कस्याः निकटे अस्ति?

ख. आदित्यदासस्य पुत्रस्य नाम किम्?

ग. वराहमिहिरस्य जन्म कदा अभवत्?

घ. वराहमिहिरः कस्मात् खगोलशास्त्रस्याध्ययनं कृतवान्?

12. **अधोलिखितं पद्यं पठित्वा उत्तराणि लिखत—**

उद्योगे नास्ति दारिद्र्यं जपतः नास्ति पातकम्।
मौने च कलहो नास्ति नास्ति जागरिते भयम्॥

क. दारिद्र्यं कुत्र नास्ति?

ख. कस्य पातकं नास्ति?

ग. कलहः कुत्र नास्ति?

घ. जागरिते किं नास्ति?

**अथवा**

न भोगभवने रमणीयम्, न च सुखशयने शयनीयम्।
अहर्निशं जागरणीयम्, लोकहितं मम करणीयम्॥

क. कुत्र न रमणीयम्?

ख. कुत्र न शयनीयम्?

ग. अहर्निशं किं करणीयम्?

घ. मम किं करणीयम्?

13. **कोष्ठकात् उचितशब्दं चित्वा लिखत—**

क. स्वामिविवेकानन्दस्य गुरुः .............आसीत्? (रामकृष्णपरमहंसः/वेदव्यासः/रामः/कृष्णः)

ख. वराहमिहिरः ............. आसीत्। (अज्ञः/विज्ञः/कालज्ञः/नीतिज्ञः)

ग. मनसा सततम्.......... । (वदनीयम्/करणीयम्/स्मरणीयम्/रमणीयम्)

घ. ............. निर्धनस्य विषमस्ति। (रोगः/भोगः/योगः/नियोगः)

ङ. ओरछानगरम् ............. अस्ति। (भोपालमण्डले/टीकमगढमण्डले/रायसेनमण्डले/मन्दसौरमण्डले)

### 14. भिन्नप्रकृतिकं शब्दं चिनुत—

क. जम्बुफलम्, कदलीफलम्, परीक्षाफलम्, श्रीफलम्।

ख. गच्छति, धावति, हरिः, खेलति।

ग. पाटलम्, चम्पकम्, दाडिमम्, कमलम्।

घ. पितामहः, मातामहः, अतुलः, मातुलः।

ङ. अद्य, श्वः, अश्वः, परश्वः।

### 15. उचितविकल्पं चित्वा लिखत—

क. स्वामिविवेकानन्दस्य बाल्यकालस्य नाम आसीत्? (गोरखनाथः/नरेन्द्रनाथः/केदारनाथः/मत्स्येन्द्रनाथः)

ख. शङ्करस्य भूषणम् अस्ति। (सर्पः/चन्द्रः/गङ्गा/विषम्)

ग. आर्यभटः आसीत्। (खगोलशास्त्री/रसायनशास्त्री/शास्त्री/समाजशास्त्री)

घ. दुःखसागरे। (त्वरणीयम्/करणीयम्/तरणीयम्/चरणीयम्)

## अष्टमः पाठः

# यक्षप्रश्नाः

P2V1A3

(महाभारतस्य यक्षप्रश्नाः अत्यन्तं प्रसिद्धाः सन्ति। वनपर्वकथानुसारं वनवासकाले एकदा पाण्डवाः वने विचरन्तः आसन्। मार्गे द्रौपदी जलम् अयाचत। प्रथमं सहदेवः पात्रं नीत्वा जलम् आनेतुं समीपवर्तिनम् एकं तड़ागम् अगच्छत्। परं न प्रत्यागच्छत्। एवं क्रमेण नकुलार्जुनभीमाः अगच्छन्, परं तेऽपि न प्रत्यागच्छन्। अन्ते स्वयं युधिष्ठिरः तत्रागत्य अपश्यत् यत् मे चत्वारः अनुजाः भूमौ निष्प्राणाः पतिताः। सः तत्कारणं ज्ञातुम् ऐच्छत् सहसा एकः विशालकायः यक्षः आगच्छत्। तेनोक्तं यत् "मम प्रश्नोत्तरं विना यदि त्वं जलं गृह्णासि तर्हि त्वमपि एवमेव निष्प्राणतां प्राप्स्यसि। अनन्तरं यक्षः प्रश्नान् अकरोत्। युधिष्ठिरस्य उत्तरैः सन्तुष्टः अनुजेभ्यः जीवनदानेन सहैव जलम् अपि अददात्।)



**यक्ष उवाच** — केनस्विच्छ्रोत्रियो भवति केनस्विद्विन्दते महत्?
केन द्वितीयवान्भवति राजन्! केन च बुद्धिमान्?

**युधिष्ठिर उवाच** — श्रुतेन श्रोत्रियो भवति, तपसा विन्दते महत्।
धृत्या द्वितीयवान्भवति, बुद्धिमान्वृद्धसेवया॥

**यक्ष उवाच** — किंस्विद् गुरुतरं भूमेः किंस्विदुच्चतरं च खात्।
किंस्विच्छीघ्रतरं वायोः किंस्विद् बहुतरं तृणात्॥

**युधिष्ठिर उवाच** — माता गुरुतरा भूमेः खात्पितोच्चतरस्तथा।
मनः शीघ्रतरं वाताच्चिन्ता बहुतरी तृणात्॥

**यक्ष उवाच** — किंस्वित्प्रवसतो मित्रं किंस्विन्मित्रं गृहे सतः।
आतुरस्य च किं मित्रं किंस्विन्मित्रं मरिष्यतः॥

**युधिष्ठिर उवाच** — सार्थः प्रवसतो मित्रं भार्या मित्रं गृहे सतः।
आतुरस्य भिषङ्मित्रं दानं मित्रं मरिष्यतः॥

(युधिष्ठिरस्य उत्तरेण सन्तुष्टः यक्षः अवदत्)

**यक्ष उवाच** — भो राजन्! त्वं भ्रातृषु यम् एकम् इच्छसि सः जीवेत्।

**युधिष्ठिर उवाच** — नकुलो जीवेत् इति ममेच्छा अस्ति।

**यक्ष उवाच** — प्रियस्ते भीमसेनोऽयमर्जुनो वः परायणम्।
तत् कस्मान्नकुलं राजन् सापत्नं जीवमिच्छसि॥

**युधिष्ठिर उवाच** — यथा कुन्ती तथा माद्री विशेषो नास्ति मे तयोः।
मातृभ्यां सममिच्छामि नकुलो यक्ष जीवतु॥

युधिष्ठिरस्य निष्पक्षतया धर्मनिष्ठया च प्रसन्नः यक्षः सर्वेभ्यः जीवनं दत्तवान्।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| विन्दते | — लाभ प्राप्त करता है | गृहे सतः | — घर में रहने वाले का |
| किंस्विद् | — क्या | आतुरस्य | — बीमार का |
| उच्चतरम् | — अधिक ऊँचा | मरिष्यतः | — मरने वाले का |
| खात् | — आकाश से | सार्थः | — धनयुक्त/अर्थसहित |
| शीघ्रतरम् | — अधिक गतिशील, तेज | भिषग् | — वैद्य |
| वातात् | — वायु से | वः | — तुम सब का |
| बहुतरम् | — बहुत फैलने वाली | परायणम् | — अनन्य भक्त |
| तृणात् | — तिनके से | सापत्नम् | — सौतले भाई (नकुल) को |
| प्रवसतः | — विदेश में रहने वाले का | साम्प्रतम् | — इस समय, श्रोत्रियो—ज्ञान |

## अभ्यासः

**1. एकपदेन उत्तरं लिखत—**

क. भूमेः गुरुतरा का?

ख. खात् उच्चतरः कः?

ग. वातात् शीघ्रतरं किम्?

घ. प्रवसतः किं मित्रम्?

ङ. आतुरस्य मित्रं किम्?

2. **एकवाक्येन उत्तरं लिखत—**

क. का तृणात् बहुतरी?
ख. गृहे सतः किं मित्रम्?
ग. युधिष्ठिरस्य मातुः नाम किम्?
घ. मरिष्यतः मित्रं किम्?
ङ. नकुलस्य मातुः नाम किम्?
च. प्रसन्नो भूत्वा यक्षः किम् अकरोत्?

3. **कोष्ठकप्रदत्तैः शब्दैः सह उचितां विभक्तिं प्रयुज्य रिक्तस्थानपूर्तिं कुरुत—**

क. चिन्ता ................ बहुतरी भवति। (तृण)
ख. माता ................ गुरुतरा अस्ति। (भूमि)
ग. वायोः ................. शीघ्रतरं भवति। (मन)
घ. भार्या मम गृहे सतः ................. भवति। (मित्र)
ङ. ............ भिषग् मित्रं भवति। (आतुर)

4. **युग्मनिर्माणं कुरुत—**

| | (अ) | | (ब) |
|---|---|---|---|
| क. | माता गुरुतरा | — | भार्या |
| ख. | वातात् शीघ्रतरम् | — | चिन्ता |
| ग. | गृहे मित्रम् | — | भूमेः |
| घ. | तृणात् बहुतरी | — | मनः |
| ङ. | मरिष्यतः मित्रम् | — | सार्थः |
| च. | प्रवसतो मित्रम् | — | दानम् |

5. **उदाहरणानुसारं निम्नलिखितपदानां समानार्थकपदानि लिखत—**

यथा — खात् — आकाशात्

भूमेः — .......................।
वातात् — .......................।
आतुरस्य — .......................।
तृणात् — .......................।
भ्रातृणाम् — .......................।
मातृभ्याम् — .......................।

**योग्यताविस्तारः —**

- महाभारते वर्णिताः कौरवपाण्डवयोः अन्याः शिक्षाप्रदाः कथाः अन्वेषयत पठत च।
- महाभारतस्य अन्याभ्यः कथाभ्यः सूक्तीनां चयनं कुरुत पठत च।

*अतः परीक्ष्य कर्त्तव्यम्।*

## नवमः पाठः

# वसन्तोत्सवः

माघमासस्य शुक्लपक्षस्य पञ्चम्यां तिथौ ऋतुराजवसन्तस्य आगमनसूचना भवति। वसन्तपञ्चमी श्रीपञ्चमी नाम्ना अपि ज्ञायते। अस्मिन् समये प्रकृतेः सौन्दर्यं चरमोत्कर्षं प्राप्नोति। सर्वत्र रमणीयतायाः दर्शनं भवति। वृक्षेषु नूतनकिसलयरागः राजते। क्षेत्रेषु सर्षपपुष्पाणां सुषमा पीतिमा च मनोहारिणी दृश्यते। आम्रेषु मञ्जरीं परितः भ्रमन्तः भ्रमराः दृश्यन्ते। कोकिलानां मधुरस्वरः चित्तम् आकर्षति। वसन्तसमये सर्वत्र रमणीयतायाः दर्शनं भवति। वसन्तोत्सवे शीतकालस्य अनन्तरं परम्परया सौन्दर्यस्य पूजनं क्रियते। विविधैः पुष्पैः, नवान्नैः, फलैः च ऋतुराजस्य वसन्तस्य स्वागतं भवति। एषः उत्सवः सौन्दर्यस्य रमणीयतायाः पुष्पाणां, किसलयानां मधुरागमनस्य च उत्सवः अस्ति।

वसन्तोत्सवस्य द्वितीयपक्षः अधिकः महनीयः अस्ति। भारते वसन्तवेलायां भगवत्याः सरस्वत्याः आराधनस्य अपि परम्परा विद्यते। वसन्तपञ्चमी ज्ञानस्य उपासनायाः आराधनायाः च उत्सवः अस्ति। प्राचीनकाले वसन्तपञ्चम्यां ज्ञानयज्ञतपस्वरूपां सरस्वतीं जनाः पूजयन्ति स्म। अधुना अपि सम्पूर्णे देशे आध्यात्मिकजिज्ञासया अस्मिन् दिने जनाः ज्ञानस्य अधिष्ठात्रीं शारदां पूजयन्ति। वसन्तोत्सवः वस्तुतः सांस्कृतिकः उत्सवः अस्ति। वैदिक-कालात् एव अस्मिन् दिने सरस्वत्याः उपासना भवति। महाभारते पुराणेष्वपि वसन्तोत्सवः सरस्वत्याः उपासनायाः उत्सवरूपेण दर्शितः। वसन्तपञ्चम्याम् आगमविधिना महाशक्त्याः सरस्वत्याः वार्षिकपूजायाः विधानं भवति। विशेषतः उत्तरभारते बिहारप्रान्ते, बङ्गालप्रान्ते तथा काश्मीरप्रदेशे सरस्वतीपूजनं बहुमान्यम् अस्ति। दक्षिणे तमिलनाडुक्षेत्रे अपि एतस्य महत्त्वं विद्यते। तत्र आबालवृद्धपरिजनाः प्रकाशितान् हस्तलिखितान् च ग्रन्थान् एकस्यां पीठिकायां संस्थाप्य विविधैः उपचारैः शारदाम् अर्चयन्ति। एतेन सममेव वाद्ययन्त्राणां वीणादीनां पूजनमपि भवति। कुत्रचित् दक्षिणभारते शिल्पिनः स्वयन्त्राणाम् अपि अस्मिन् दिने पूजनं कुर्वन्ति।



सरस्वतीपूजनस्य वेदाध्ययनसत्रं श्रावणीपूर्णिमातः आरभ्य वसन्तपञ्चमीं यावत् भवति। सरस्वतीं पूजयित्वा ऋतुपरिवर्तनस्यारम्भे जीवने हर्षोल्लासं, सौन्दर्यं, शृङ्गारं च कामयितुं वसन्तस्य, कामदेवस्य अपि पूजनं परम्परया भवति। वस्तुतः भारतीयपरम्परायां वसन्तोत्सवः सौन्दर्यस्य, उल्लासस्य, ज्ञानस्य उपासनायाः च उत्सवः। एषः भारतीयानां उत्सवप्रियतायाः शास्त्रीयं, सामाजिकं तथा वैज्ञानिकं चिन्तनम् अपि द्योतयति।

## शब्दार्थाः

| | | |
|---|---|---|
| चरमोत्कर्षम् | — | अत्यधिक उन्नत |
| नूतनकिसलयरागः | — | नवीन पत्तों की शोभा |
| मञ्जरी | — | बौर (आम के बौर) |
| अधिष्ठात्रीम् | — | मुख्य देवी को |
| वाद्ययन्त्राणाम् (वाद्योपकरणानाम्) | — | बजाए जाने वाले यंत्रों का (वीणा आदि) |
| वेदाध्ययनसत्रम् | — | वेद के अध्ययन की अवधि |
| उल्लासः | — | हर्ष, सर्षप — सरसों |
| आबालवृद्धाः | — | बच्चों से लेकर वृद्ध तक |
| पीठिका | — | चौकी |
| विधानम् | — | विधि |
| उपचारैः | — | पूजा विधि से |
| महनीयः | — | महत्तर |
| आगमविधिना | — | शास्त्रवर्णित विधि से |

## अभ्यासः

1. **एकपदेन उत्तरं लिखत—**

   क. वसन्तपञ्चमी कस्य आगमनं सूचयति?

   ख. केषु नूतनकिसलयरागः राजते?

   ग. कोकिलानां मधुरस्वरः किम् आकर्षति।

   घ. वसन्तोत्सवे कस्याः पूजनं भवति?

   ङ. ज्ञानस्य अधिष्ठात्री देवी का?

2. **एकवाक्येन उत्तरं लिखत—**

   क. ऋतुराजवसन्तस्य आगमन-सूचना कदा भवति?

   ख. आम्रेषु कीदृशाः भ्रमराः दृश्यन्ते?

   ग. तमिलनाडुराज्ये जनाः शारदां कथम् अर्चयन्ति?

   घ. वसन्तोत्सवः किं किं द्योतयति?

   ङ. उत्तरभारते कुत्र-कुत्र सरस्वतीपूजनं बहुमान्यम् अस्ति?

3. **प्रश्ननिर्माणं कुरुत ( रेखाङ्कितपदम् आधृत्य )—**

क. विविधैः पुष्पैः <u>ऋतुराजस्य</u> स्वागतं भवति।

ख. <u>पुस्तकानाम्</u> अपि पूजनं भवति।

ग. <u>शारदाम्</u> अर्चयन्ति।

घ. सौन्दर्यं कामयितुं <u>वसन्तपूजनं</u> भवति।

ङ. श्रीपञ्चमीनाम्ना <u>वसन्तपञ्चमी</u> ज्ञायते।

4. **अर्थानुसारं युग्मानि योजयत—**

| | ( अ ) | ( ब ) |
|---|---|---|
| क. | मञ्जरीं परितः | श्रीपञ्चमी |
| ख. | सरस्वतीं | वसन्तपञ्चमीं यावत् |
| ग. | वसन्तपञ्चमी | भ्रमराः दृश्यन्ते |
| घ. | श्रावणपूर्णिमातः | चरमोत्कर्षं प्राप्नोति |
| ङ. | प्रकृतेः सौन्दर्यं | पूजयन्ति स्म |

5. **नामोल्लेखपूर्वकं समासविग्रहं कुरुत—**

क. सरस्वतीपूजनम् ख. वसन्तसमये

ग. प्राचीनकाले घ. वसन्तोत्सवः

6. **नामोल्लेखपूर्वकं सन्धिविच्छेदं कुरुत—**

क. चरमोत्कर्षम् ख. पुराणेष्वपि

ग. पूजनमपि घ. सममेव

7. **पाठात् पञ्च अव्ययानि चित्वा लिखत।**

**योग्यताविस्तारः —**

- वसन्तोत्सवस्य विशेषताः आधृत्य पञ्च वाक्यानि लिखत।
- भवतः/भवत्याः विद्यालये आयोजितम् उत्सवम् आधृत्य पञ्चवाक्यानि लिखत।

*सर्वं प्रियं चारुतरं वसन्ते।*

## दशमः पाठः

# आजादचन्द्रशेखरः

E1U5R3



(आचार्यः कक्षायां शिक्षयति)

आचार्यः — भो रमे! श्वः कः दिनाङ्कः अस्ति?

रमा — श्वः जुलाईमासस्य त्रयोविंशतिदिनाङ्कः अस्ति।

आचार्यः — जुलाईमासस्य त्रयोविंशतिदिनाङ्कः किमर्थं प्रसिद्धः?

प्रिया — अस्मिन्नेव दिनाङ्के आजादचन्द्रशेखरस्य जयन्त्याः उत्सवः आयोज्यते।

आचार्यः — चन्द्रशेखरस्य जन्म कस्मिन् ख्रिस्ताब्दे अभवत्?

विभुः — चन्द्रशेखरस्य जन्म 1906 ख्रिस्ताब्दे अभवत्।

आचार्यः — सम्यगुक्तं भवता।

रमा — भो आचार्य! चन्द्रशेखरस्य जन्म कुत्र अभवत्?

आचार्यः — चन्द्रशेखरस्य जन्म मध्यप्रदेशे अलीराजपुरमण्डलान्तर्गते 'चन्द्रशेखर आजाद नगर' नामकग्रामे अभवत्।

प्रिया — भो आचार्य! कौ तस्य पितरौ?

आचार्यः — सीतारामतिवारी तस्य पिता, जगरानीदेवी च तस्य माता आसीत्।

विभुः — तस्य अध्ययनं कुत्र अभवत्?

आचार्यः — वाराणस्याम् एकस्मिन् संस्कृतविद्यालये तस्य अध्ययनं जातम्। सः संस्कृतम् अधीतवान्।

(साश्चर्यम् सर्वे अहो! एषः संस्कृतम् अधीतवान्)

पीयूषः — ततः सः किमकरोत्?

आचार्यः — वाराणस्यां संस्कृतविद्यालये अध्ययनं कुर्वन् एव पञ्चदशवर्षीयः चन्द्रशेखरः स्वतन्त्रतान्दोलने प्राविशत्। आङ्ग्लैः स्वाधीनतान्दोलनकारिणां दमनकाले सः पाषाणखण्डेन एकं रक्षकं प्राहरत्।

रमा — ततः किम् अभवत्?

आचार्यः — ततः प्रहरी तं निगृह्य न्यायालये प्रस्तुतवान्।

प्रिया — न्यायालये किं जातम्?

आचार्यः — न्यायालये न्यायाधीशेन तस्य आयुषो गणनानुसारं पञ्चदशवेत्रप्रहारैः सः दण्डितः।

विभुः — दण्डकाले चन्द्रशेखरस्य का प्रतिक्रिया अभवत्?

आचार्यः — प्रथमं तु चन्द्रशेखरन्यायाधीशयोः संवादं शृणुत—

न्यायाधीशः — किं तव नाम?

चन्द्रशेखरः — 'आजादः।'

न्यायाधीशः — किं तव पितुः नाम?

चन्द्रशेखरः — 'स्वाधीनः।'

न्यायाधीशः — कुत्र तव गृहम्?

चन्द्रशेखरः — कारागारः।

पीयूषः — ततस्ततः?

आचार्यः — ततस्तु वेत्रप्रहारैः चन्द्रशेखरः मूर्च्छापर्यन्तं 'जयतु भारतम्' इति उच्चैः अघोषयत्। तस्मात् कालादेव सः 'आजाद-चन्द्रशेखर' इति नाम्ना प्रसिद्धः।

रमा — स्वतन्त्रतायै सः किं कृतवान्?

आचार्यः — तेन 'हिन्दुस्तान सोसलिस्ट रिपब्लिकन आर्मी' इति स्वाधीनतासैनिकानाम् एकं सङ्घटनं कृतम्। तस्मिन् सङ्घटने भगतसिंह-राजगुरु-बटुकेश्वर-शिवराम-सुखदेवसदृशाः क्रान्तिकारिणः तस्य सहायकाः अभवन्। काकोरी-साईमनकमीशन-केन्द्रीय-असेम्बलीमध्ये आग्नेयास्त्रप्रक्षेपणादिषु सः शिरोमणिः।

प्रिया — कः तस्य आदर्शः?

आचार्यः — देशभक्तिः। अपि च तस्य जनकस्य सहायतार्थं मित्रैः प्रदत्तधनमपि सः क्रान्तिकार्येषु व्ययं कृतवान्।



विभुः — कथं कदा च तस्य बलिदानम् अभवत्?

आचार्यः — फरवरिमासस्य सप्तविंशतितमे दिनाङ्के 1931 ख्रिस्ताब्दे इलाहाबादनगरे (प्रयाग-नगरे) 'आजाद-उद्यानम्' (अल्फ्रेड पार्क) इति स्थाने आङ्ग्लगुप्त-चरेणाधीक्षकेण नॉट-बाबरेण गोलिकाभिः युद्ध्यमानः यदा आत्मानम् असहायम् अमन्यत तदा निग्रहभयात् स्वहस्तेनैव स्वकीये मस्तके गोलिकाप्रहारेण सः वीरगतिं प्राप्नोत्।

## शब्दार्थाः

| | | | | | |
|---|---|---|---|---|---|
| जयन्त्याः | — | जयन्ती का | सङ्घटनम् | — | संघ को |
| ख्रिस्ताब्दे | — | ईस्वी में | आग्नेयास्त्रम् | — | बम |
| सम्यगुक्तम् | — | ठीक कहा | निग्रहभयात् | — | पकड़े जाने के भय से |
| निगृह्य | — | पकड़कर | वेत्रप्रहारैः | — | बेंत के प्रहारों से |
| मूर्च्छापर्यन्तम् | — | मूर्च्छित होने तक | | | |

## अभ्यासः

1. **एकपदेन उत्तरं लिखत—**

   क. चन्द्रशेखरस्य जन्म कस्मिन् ग्रामे अभवत्?

   ख. चन्द्रशेखरस्य जन्म कस्मिन् मण्डले अभवत्?

   ग. चन्द्रशेखरस्य मातुः नाम किम्?

   घ. चन्द्रशेखरस्य पितुः नाम किम्?

   ङ. चन्द्रशेखरः कां भाषाम् अधीतवान्?

2. **एकवाक्येन उत्तरं लिखत—**

   क. चन्द्रशेखरस्य जन्म कदा अभवत्?

   ख. चन्द्रशेखरस्य अध्ययनं कुत्र जातम्?

   ग. चन्द्रशेखरेण केन नाम्ना सङ्घटनं कृतम्?

   घ. स्वाधीनतान्दोलने के के चन्द्रशेखरस्य सहायकाः अभवन्?

   ङ. चन्द्रशेखरः कथं वीरगतिं प्राप्नोत्?

3. **उचितं मेलयत—**

| | (अ) | | (ब) |
|---|---|---|---|
| क. | चन्द्रशेखरः मूर्च्छितः | — | जयतु भारतम् |
| ख. | दण्डकाले चन्द्रशेखरः अघोषयत् | — | संस्कृतम् |
| ग. | काकोरीकाण्डस्य शिरोमणिः | — | वेत्रप्रहारैः |
| घ. | चन्द्रशेखरेण अधीतम् | — | नॉट-बाबरेण सह |
| ङ. | चन्द्रशेखरः अयुद्ध्यत् | — | चन्द्रशेखरः |

4. **नामोल्लेखपूर्वकं समास-विग्रहं कुरुत —**

क. संस्कृतविद्यालये

ख. पाषाणखण्डेन

ग. निग्रहभयात्

घ. वीरगतिम्

5. **अधोलिखितैः अव्ययैः वाक्यनिर्माणं कुरुत —**

क. कदा

ख. च

ग. एव

घ. अपि

ङ. श्वः

**योग्यताविस्तारः —**

- आजादचन्द्रशेखरस्य अन्यं वृत्तान्तं पठत।
- आजादचन्द्रशेखरस्य अन्यसहयोगिनां जीवनवृत्तं योगदानं च पठत।
- स्वतन्त्रतासैनिकानां चित्राणि एकत्रीकुरुत।
- स्वकीयनगरस्य ग्रामस्य वा स्वाधीनतासैनिकानां नामानि लिखत।

*इदं राष्ट्राय स्वाहा।*

# एकादशः पाठः

# सुभाषितानि

N3M6F3

परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम्।
वर्जयेत्तादृशं मित्रं विषकुम्भं पयोमुखम्॥1॥

अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति।
व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात्॥2॥

विना वेदं विना गीतां, विना रामायणीं कथाम्।
विना कविं कालिदासं, भारतं भारतं न हि॥3॥

उदये सविता ताम्रस्ताम्र एवास्तमेति च।
सम्पत्तौ च विपत्तौ च, महतामेकरूपता॥4॥

उद्यमं साहसं धैर्यं बुद्धिः शक्तिः पराक्रमः।
षडेते यत्र वर्तन्ते तत्र देवः सहायकः॥5॥

नरत्वं दुर्लभं लोके, विद्या तत्र सुदुर्लभा।
कवित्वं दुर्लभं तत्र, शक्तिस्तत्र सुदुर्लभा॥6॥

अयं निजः परोवेति गणना लघुचेतसाम्।
उदारचरितानां तु वसुधैवकुटुम्बकम्॥7॥

छायामन्यस्य कुर्वन्ति तिष्ठन्ति स्वयमातपे।
फलान्यपि परार्थाय वृक्षाः सत्पुरुषा इव॥8॥

निन्दन्तु नीतिनिपुणाः यदि वा स्तुवन्तु
लक्ष्मीः समाविशतु, गच्छतु वा यथेष्टम्।
अद्यैव वा मरणमस्तु युगान्तरे वा
न्याय्यात्पथः प्रविचलन्ति पदं न धीराः॥9॥

## शब्दार्थाः

| | | | | | |
|---|---|---|---|---|---|
| सम्पत्तौ | — | सम्पत्ति में | एकरूपता | — | समानता |
| विपत्तौ | — | विपत्ति में | उदये | — | उदय होते समय में |
| महताम् | — | बड़ों का, | सविता | — | सूर्य |

| | | | | | |
|---|---|---|---|---|---|
| ताम्रः | — | तांबे के समान लाल | नरत्वम् | — | मानवता |
| परोक्षे | — | पीछे | दुर्लभम् | — | कठिनता से प्राप्त |
| वर्जयेत् | — | रोके | कुटुम्बकम् | — | परिवार |
| क्षयमायाति | — | क्षीण होता है | लघुचेतसाम् | — | छोटे मन वालों का |
| भारति | — | हे सरस्वती जी | उदारचरितानाम् | — | उदार हृदय वालों का |
| निन्दन्तु | — | निन्दा करें | आतपे | — | धूप में |
| समाविशतु | — | अच्छे प्रकार से आए | परार्थाय | — | दूसरों के लिए |
| युगान्तरे | — | दूसरे युग में | सत्पुरुषाः | — | सज्जन व्यक्ति |
| यथेष्टम् | — | इच्छित को | स्तुवन्तु | — | स्तुति करें |

## अभ्यासः

**1. एकपदेन उत्तरं लिखत —**

क. सम्पत्तौ विपत्तौ च केषाम् एकरूपता?

ख. अस्तसमये सूर्यस्य वर्णः कः भवति?

ग. नरत्वं दुर्लभं कुत्र?

घ. केषां वसुधैवकुटुम्बकम्?

ङ. परार्थाय वृक्षाः कानि यच्छन्ति?

**2. एकवाक्येन उत्तरं लिखत —**

क. सूर्यस्य वर्णः ताम्रः कदा-कदा भवति?

ख. भारत्याः कोशः कस्मात् क्षयमायाति?

ग. वृक्षाणां स्वभावः कीदृशः?

घ. न्याय्यात्पथः पदमपि के न विचलन्ति?

ङ. लोके विद्या कीदृशी?

**3. सन्धिविच्छेदं कुरुत —**

क. कोशोऽयम्

ख. यथेष्टम्

ग. फलान्यपि

ङ. युगान्तरे

4. **श्लोकं पूरयत —**

विना वेदं विना गीतां ......................।

............................ भारतं भारतं न हि॥

5. **उचितं मेलयत —**

| | (अ) | | (ब) |
|---|---|---|---|
| क. | उदये सविता | – | भारतं भारतं न हि |
| ख. | अपूर्वः कोशः | – | ताम्रः |
| ग. | विना वेदं | – | तव भारति |
| घ. | न्याय्यात्पथः | – | सुदुर्लभा |
| ङ. | शक्तिस्तत्र | – | धीराः |

6. **अधोलिखितैः शब्दैः वाक्यरचनां कुरुत —**

क. देवः

ख. व्ययतः

ग. द्रुमः

घ. लक्ष्मीः

ङ. फलानि

**योग्यताविस्तारः —**

- पाठे दत्तानां श्लोकानां कण्ठस्थीकरणं कुरुत।

*वाग्भूषणं भूषणम्।*

# द्वादशः पाठः

# चित्रकूटम्

P9E4H9

मध्यप्रदेशस्य सतनामण्डले विन्ध्यपर्वतमालायाः मध्ये नैसर्गिकेऽतिरमणीये विस्तृते क्षेत्रे तीर्थस्थलं चित्रकूटं स्थितम् अस्ति। इदं स्थलं नगरकोलाहलरहितं प्राकृतिकसौन्दर्यसम्पन्नम् अस्ति। अत्र आगमनेन दर्शनेन च सहजतया आनन्दानुभूतिः जायते। चित्रकूटे सघनानि वनानि सन्ति, अत्र कल-कलनादपूरिताः निर्झराः अपि वर्तन्ते। सर्वत्र हरीतिमा राजते। चित्रकूटस्य धार्मिकं, सांस्कृतिकं, नैसर्गिकम् अपि महत्त्वं विद्यते। कथ्यते यत्- भगवान् रामचन्द्रः वनवासकाले सीतालक्ष्मणाभ्यां सह एकादशवर्षाणि यावत् चित्रकूटे एव निवासं कृतवान्। महर्षिः अत्रिः, साध्वी अनसूया च अत्रैव तपस्यां कृत्वा आत्मज्ञानम् अलभेताम्। जनश्रुत्यनुसारम् अत्रैव अनसूया ब्रह्मा-विष्णु-महेशानां स्वतपसा बालरूपेण साक्षात्कारं कृतवती। अत्र अनेकानि दर्शनीयानि स्थलानि सन्ति। यथा—

**रामघट्टः—** मन्दाकिन्याः तटे रामघट्टः अस्ति। अयम् अतीवरमणीयः घट्टः। अत्र साधूनां महात्मनां तीर्थयात्रिणां च प्रायः सम्मर्दः भवति। सूर्योदयात् सूर्यास्तं यावत् मन्त्रोच्चारणेन वातावरणं गुञ्जायितं भवति। सन्ध्याकाले नीराजनसमये मनोरमदृश्यं भवति। अत्र नौकाविहारस्य आनन्दः अपि यात्रिभिः लभ्यते।



**कामदगिरिः—** कामदगिरिस्थलस्य धार्मिकं महत्त्वं लोकप्रसिद्धम्। एतत् स्थलं हरीतिमाच्छादितम् अस्ति। अत्र श्रद्धालवः भगवतः रामस्य प्रतीकस्वरूपं चरणचिह्नं पूजयन्ति। मान्यता अस्ति यद् भरतः अयोध्यावासिभिः सह रामं पुनः अयोध्याम् आनेतुम् अत्रैव प्रार्थितवान्। अत्रैव समीपे भरतमिलापमन्दिरम् अस्ति। कामदगिरेः प्रदक्षिणा जनैः क्रियते।

**जानकीकुण्डम् —** रामघट्टात् नातिदूरम् एव जानकीकुण्डम् अस्ति। तत्र नौकया अपि गन्तुं शक्यते। अत्र मन्दाकिन्याः शान्तं जलम् अतीतस्मृतिपूरितम् इव स्थिरं भाति। वनवासे सीता अत्रैव स्नानं करोति स्म। अत एव एतस्य नाम जानकीकुण्डम् इति प्रसिद्धम्।

**अनसूयाश्रमः —** सघनवनमध्ये अनसूयाश्रमः विद्यते। अत्र पक्षिणां कलरवः, निर्झरझर्झरध्वनिः शीतलवायुः च मनांसि रञ्जयन्ति। मन्दाकिन्याः उद्गमस्थलम् एतदेव। अत्र ब्रह्म-विष्णु-महेशात्रि-अनसूयादयः तपस्याम् अकुर्वन्।

**स्फटिकशिला —** जानकीकुण्डसमीपे एव विशाला शिला दर्शनीया वर्तते। अत्रैव जयन्तः काकरूपेण सीताचरणे चञ्चुप्रहारं कृतवान् आसीत् इति प्रसिद्धम्।

**गुप्तगोदावरी —** चित्रकूटतः पञ्चक्रोशदूरं नयनाभिरामं सौन्दर्ययुक्तं गुप्तगोदावरीस्थलं वर्तते। अत्र द्वे नैसर्गिके गुहे स्तः। अत्र निरन्तरं जलं प्रवहति।

**हनुमान्धारा —** अत्र उच्चस्थलात् जलं पतति। जलप्रपातः अत्र खलु द्रष्टव्यः एव। लङ्कादहनानन्तरं रामाज्ञया हनुमान् अत्रैव शीतलत्वं प्राप्तवान् अतः एतस्य नाम हनुमान्धारा इति जनश्रुतिः।

**ग्रामोदयविश्वविद्यालयः —** अत्र राष्ट्रसेवकेन नानाजीदेशमुखेन ग्रामोद्धारभावनया नवीनः प्रकल्पः स्थापितः। चित्रकूटग्रामोदयविश्वविद्यालयः, साम्प्रतं सः महात्मागान्धिग्रामोदयविश्वविद्यालयः इति नाम्ना प्रसिद्धः। अत्र प्राकृतिकचिकित्साप्रकल्पः अपि वर्तते। कृषेः अनुसन्धानकार्येषु अत्र महती प्रगतिः दृश्यते।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| मण्डले | — जिले में | अतीतस्मृतिपूरितम् | — प्राचीन स्मृतियों (यादों) से भरा |
| नैसर्गिके | — प्राकृतिक रूप में | जयन्तः | — इन्द्र का पुत्र (काक रूपधारी) |
| सहजतया | — स्वाभाविक रूप से | | |
| कल-कलनादपूरिताः | — कल-कल स्वर से भरपूर | चञ्चुप्रहारम् | — चोंच से प्रहार |
| | | गुहे | — दो गुफाएँ |
| सम्मर्दः | — भीड़ (समूह) | | |
| गुञ्जायितम् | — गुञ्जित हुआ | नयनाभिरामं | आँखों को अच्छा लगने वाला |
| नीराजनसमये | — आरती के समय | प्रकल्पः | विचार |
| यात्रिभिः | — यात्रियों के द्वारा | | |

# अभ्यासः

## 1. एकपदेन उत्तरं लिखत —

क. चित्रकूटं कस्मिन् मण्डले अस्ति?

ख. चित्रकूटे सर्वत्र किं राजते?

ग. रामघट्टः कस्याः तटे वर्तते?

घ. चित्रकूटे जलप्रपातस्य किं नाम?

ङ. जयन्तः सीताचरणे किं कृतवान्?

## 2. एकवाक्येन उत्तरं लिखत —

क. चित्रकूटं कीदृशं स्थलम् अस्ति?

ख. निर्झराः कीदृशाः वर्तन्ते?

ग. हनुमान्धारा इति नाम कथं प्रसिद्धम्?

घ. चित्रकूटे कः विश्वविद्यालयः अस्ति।

## 3. रिक्तस्थानं पूरयत —

क. चित्रकूटं ...................... मध्ये स्थितम्।

ख. रामचन्द्रः ...................... यावत् निवासं कृतवान्।

ग. चित्रकूटे द्वे ........................ स्तः।

घ. सघनवनमध्ये ................... विद्यते।

ङ. चित्रकूटे ..................... नदी प्रसिद्धा।

## 4. उचितपदेन योजयत —

| | (अ) | | (ब) |
|---|---|---|---|
| क. | चित्रकूटम् | – | ग्रामोदयविश्वविद्यालयः |
| ख. | जलप्रपातः | – | सतनामण्डले |
| ग. | नानाजीदेशमुखः | – | महर्षिः अत्रिः |
| घ. | आत्मज्ञानम् | – | हनुमान्धारा |

## 5. कोष्ठकात् शब्दान् चित्वा प्रश्ननिर्माणं कुरुत—

(कस्मिन्, कस्याः, कीदृशानि, कस्मात्, के)

क. चित्रकूटं <u>सतना</u> मण्डले अस्ति।

ख. रामघट्टः <u>मन्दाकिन्याः</u> तटे अस्ति।

ग. चित्रकूटे <u>सघनानि</u> वनानि सन्ति।

घ. <u>रामघट्टात्</u> नातिदूरं जानकीकुण्डम्।

ङ. चित्रकूटे <u>द्वे</u> नैसर्गिके गुहे स्तः।

6. शब्दं/धातुं प्रत्ययं च लिखत—

| | | शब्दः/धातुः | प्रत्ययः |
|---|---|---|---|
| क. | गन्तुम् | | |
| ख. | कृतवान् | | |
| ग. | आनेतुम् | | |
| घ. | चित्रकूटतः | | |
| ङ. | दर्शनीया | | |

7. विभक्तिं लिङ्गं वचनं च लिखत—

| | | विभक्तिः | लिङ्गम् | वचनम् |
|---|---|---|---|---|
| क. | मण्डले | | | |
| ख. | यात्रिकैः | | | |
| ग. | मालायाः | | | |
| घ. | कामदगिरेः | | | |
| ङ. | तपस्याम् | | | |

**योग्यताविस्तारः —**

- चित्रकूटस्थस्थलानां चित्राणि सङ्कलनीयानि।
- अन्यं दर्शनीयस्थलं ज्ञातव्यम्।

*चित्रकूटस्य कूटोऽयं दृश्यते सर्वतः शुभः।*

# त्रयोदशः पाठः

# आचार्योपदेशाः

(संस्कृते नाटकानां परम्परा अतिप्राचीना अस्ति। इयं परम्परा साम्प्रतमपि निर्बाधरूपेण प्रचलति। विंशशताब्द्यां गुर्जरप्रदेशीय-श्रीमूलशङ्करमाणिकलालयाज्ञिकेनापि अनेकानि पुस्तकानि रचितानि। तेषु संस्कृतभाषायां-संयोगितास्वयंवरं प्रतापविजयं छत्रपतिसाम्राज्यञ्च वर्ण्यन्ते।

'छत्रपतिसाम्राज्यम्' तु ऐतिहासिकं नाटकम् अस्ति। नाट्येऽस्मिन् छत्रपतिशिवराजस्य शौर्यपूर्णकार्याणाम् एवं तात्कालिकयवन-सम्राड्दुर्नीतिविरुद्धसङ्घर्षस्य अन्ते च स्वराज्यसंस्थापनायाः चित्रणमस्ति।

प्रस्तुतोऽयं नाट्यांशः 'छत्रपतिसाम्राज्यम्' इति नाटकात् एव उद्धृतः। अस्मिन् शिवराजस्य गुरोः श्रीरामदासस्योपदेशाः सन्ति। राष्ट्रभक्तिभावनाभरितोऽयम् अंशः निदर्शनीयः।)

(ततः प्रविशति रामदासेन सह शिवराजः)



**शिवराजः** — (सप्रश्रयम्) दिष्ट्याद्य कृतार्थतां गमितोऽस्मि चिरप्रार्थितेन भगवत्-प्रसाद-अधिगमेन।

(इति पुष्पस्रजं कण्ठे समर्प्य पादयोः पतति।)

**श्रीरामदासः** — भारतैकवीर! उत्तिष्ठ। धर्मराज्य-संस्थापनार्थं शङ्कर-अंशेन-अवतीर्णस्य तव भवतु सर्वत्र अप्रतिहतो विजयः।

**शिवराजः** - (उत्थाय) प्रतिगृहीताशीः।

**श्रीरामदासः** — व्यवस्थितवर्णाश्रमे अस्मिन् भारते वर्षे दुष्कृतां हिंसनं साधूनां च परित्राणम् एव क्षत्रियस्य परो धर्मः। तत् नयमार्गम् अवलम्ब्य उत्पथगामिनो नृपाधमान् च उन्मूल्य प्रवर्तय स्वधर्मशासनम् यतः—

वृत्तं यथा धर्मभयेन रक्ष्यते नृभिस्तथा नैव नरेन्द्रशासनात्।
धर्मान् सदाचारपरानतो नृपः प्रजाहितज्ञो नियमेन पालयेत्॥

**शिवराजः** — भगवन्! तव अनुग्रहेण अद्य निवृत्तं मे मोहावरणम्। नवीकृतश्च साम्राज्य-संस्थापनोत्साहः।

**श्रीरामदासः** — वत्स! तव साहाय्यार्थं प्रतिमठं मया निर्मीयन्ते राष्ट्रभावभाविताः शतशो युवगणाः। तदिमे—

> व्यायामयोगोपचिताङ्गसत्त्वा विद्याकलादण्डनयप्रतिष्ठिताः।
> राष्ट्रैकभक्ता उपधाविशोधिता भवन्तु ते भाविरणे सहायाः॥

**शिवराजः** — अहो, परमार्थतो भगवतैवारब्धे राष्ट्र-उद्धरण-उद्यमे अहं तु निमित्तमात्रमेव।

**श्रीरामदासः** — वत्स! न केवलं शिष्य इति, त्वमसि मम प्रेमास्पदम्। अपितु त्वमसि मे द्वितीयं हृदयं त्वदधीनैवास्ति मे साध्यसिद्धिः। तन्मया सततं सावधानेन उदीक्ष्यते त्वद् विजयध्वजप्रसरः। सम्प्रत्यपि त्वां निर्विण्णम् उपश्रुत्य संप्राप्तोऽस्मि अहं तव प्रोत्साहनार्थम् एतद् दुर्गराजम्। अथ त्वां स्वकर्मणि अभिप्रवृत्तं वीक्ष्य प्रतिष्ठेऽहं धर्मप्रवचनाय दुर्गान्तरम्।

**शिवराजः** — भगवतानुग्राह्यः अयं जनो भूयो दर्शनेन।

**श्रीरामदासः** — भारतैकवीर! सम्पादयतु तवाभीष्टं भगवती परदेवता।

(इति निष्क्रान्तः)

## शब्दार्थाः

| | | | |
|---|---|---|---|
| सप्रश्रयम् | — विनम्रतापूर्वक | दुष्कृताम् | — निन्दितकर्म करने वालों का या दुष्कर्मियों का |
| पुष्पस्त्रजम् | — पुष्पहार | | |
| दिष्ट्या | — सौभाग्य से | | |
| कृतार्थताम् | — सफलता को | हिंसनम् | — मारना |
| अस्मिन् | — इसमें | परित्राणम् | — सुरक्षा |
| प्रसादाधिगमेन | — कृपापूर्वक आने से | परोधर्मः | — श्रेष्ठ धर्म |
| समर्प्य | - समर्पित करके | नयमार्गम् | — नीतिपथ |
| पादयोः | — पैरों पर | अवलम्ब्य | — सहारा लेकर |
| उत्तिष्ठ | — उठो | उत्पथगामिनः | — कुमार्ग गामी |
| संस्थापनार्थम् | — अच्छे प्रकार से स्थापना के लिए | नृपाधमान् | — अधम राजाओं को |
| | | धर्मशासनम् | — धर्मराज्य |
| अंशेन | — खण्ड के द्वारा | वृत्तम् | — चरित्र को |
| अवतीर्णस्य | — अवतरित का | नृभिः | — मनुष्यों के द्वारा |
| अप्रतिहतः | — निर्बाध, निर्विघ्न | सदाचारपरान् | — सदाचार परायणो या सदाचारियों को |
| उत्थाय | — उठकर | | |
| प्रतिगृहीताशीः | — आशीर्वाद प्राप्त | गमितोऽस्मि | — प्राप्त हुआ |

प्रजाहितज्ञः — प्रजाहित का ज्ञाता या प्रजा के हित को जानने वाला

अनुग्रहेण — कृपा से

निवृत्तम् — समाप्त

मोहावरणम् — मोह का आवरण

नवीकृतः — नया कर दिया

प्रतिमठम् — प्रत्येक आश्रम में

निर्मीयन्ते — तैयार किए जाते हैं

राष्ट्रभावभाविताः — राष्ट्रिय भावना वाले

शतशः — सैकड़ों

युवगणाः — युवक समूह

व्यायामयोगोपचिताः — व्यायाम और योग से प्राप्त

अङ्गसत्वाः — अंगों की शक्ति वाले

विद्याकलादण्डनयप्रतिष्ठिताः — विद्याओं, कलाओं और दण्डनीति में कुशल

उपधाविशोधिता — धर्म, अर्थ में परीक्षित या संस्कारित

भाविरणे — भविष्य में होने वाले समर में

सहायाः — सहायता करने वाले

भवन्तु — होवें

परमार्थतः — वस्तुतः

आरब्धे — आरम्भ किए गये

प्रेमास्पदम् — प्रिय

साध्यसिद्धिः — लक्ष्य की प्राप्ति

सततम् — निरन्तर

उदीक्ष्यते — सादर दिखाई देता है

विजयध्वजप्रसरः — विजय पताका का लहराना

सम्प्रत्यपि — इस समय भी

निर्विण्णम् — विरल हृदय को

प्रोत्साहनार्थम् — उत्साह बढ़ाने के लिए

दुर्गराजम् — विशाल दुर्ग या बड़ा किला

स्वकर्मणि — अपने कार्य में

अभिप्रवृत्तम् — लगा हुआ

वीक्ष्य — देखकर

प्रतिष्ठेऽहम् — मैं प्रस्थान करता हूँ

धर्मप्रवचनाय — धर्म के उपदेश देने के लिए

दुर्गान्तरम् — दूसरे दुर्ग (किला) को

अनुग्राह्यः — कृपा करने योग्य

भूयः — फिर

सम्पादयतु — पूरा करें

अभीष्टम् — इच्छित

## अभ्यासः

1. एकपदेन उत्तरं लिखत —

क. पुष्पस्रजं कण्ठे कः समर्पयति?

ख. वृत्तं केन रक्ष्यते?

ग. अद्य मे किं निवृत्तम्?

घ. नृपः धर्मान् केन पालयेत्?

ङ. शिवराजं भारतैकवीर! इति शब्देन कः सम्बोधयति?

## 2. एकवाक्येन उत्तरं लिखत —

क. शिवराजस्य गुरुः कः आसीत्?

ख. क्षत्रियस्य परो धर्मः किम् अस्ति?

ग. शिवराजस्य साहाय्यार्थं श्रीरामदासः किं करोति स्म?

घ. कीदृशाः युवगणाः भाविरणे सहायाः भविष्यन्ति?

ङ शिवराजस्य अभीष्टं का सम्पादयतु?

## 3. रिक्तस्थानं पूरयत —

क. वृत्तं यथा ................ रक्ष्यते।

ख. प्रजाहितज्ञो नियमेन ................।

ग. मया ................ राष्ट्रभावभाविताः।

घ. अपितु त्वमसि मे ................।

ङ. ...................... सम्पादयतु तवाभीष्टम्।

## 4. सन्धि-विच्छेदं कुरुत—

क. गमितोऽस्मि

ख. त्वमसि

ग. नृभिस्तथा

घ. भगवतैवारब्धे

ङ. भारतैकवीरः

च. सम्प्रत्यपि

छ. प्रतिष्ठेऽहम्

ज. तवाभीष्टम्

झ. योगोपचिताः

ण. राष्ट्रैकभक्तेः

## 5. सन्धिं कुरुत—

क. शङ्कर + अंशेन + अवतीर्णस्य = ....................................।

ख. वर्णाश्रमे + अस्मिन् = ....................................।

ग. उत् + मूल्य = ....................................।

घ. राष्ट्र + उद्धरण + उद्यमे = ....................................।

ङ. उत् + ईक्ष्यते = ....................................।

## 6. श्लोकं पूरयत—

वृत्तं यथा धर्मभयेन रक्ष्यते ...........................................।

...................................... प्रजाहितज्ञो नियमेन पालयेत्॥

7. **संस्कृतेन भावार्थं लिखत—**

व्यायामयोगोपचिताङ्गसत्त्वा विद्याकलादण्डनयप्रतिष्ठिताः।
राष्ट्रैकभक्ता उपधाविशोधिता भवन्तु ते भाविरणे सहायाः॥

8. **निम्नाङ्कितशब्दान् आधृत्य वाक्यरचनां कुरुत—**

क. दिष्ट्या
ख. सदाचारः
ग. परित्राणम्
घ. धर्मशासनम्
ङ. राष्ट्रियभावना

9. **अर्थानुसारं युग्मनिर्माणं कुरुत—**

| | (अ) | | (ब) |
|---|---|---|---|
| क. | साधूनाम् | – | रक्ष्यते |
| ख. | शिवराजः | – | तवाभीष्टम् |
| ग. | दुष्कृताम् | – | रक्षणम् |
| घ. | धर्मभयेन | – | हिंसनम् |
| ङ. | सम्पादयतु | – | श्रीरामदासः |

10. **निम्नाङ्कितपदानां विलोमपदानि लिखत—**

| | पदानि | विलोमपदम् |
|---|---|---|
| यथा— | जयः | पराजयः |
| क. | मया | .................. |
| ख. | निवृत्तम् | .................. |
| ग. | तव | .................. |
| घ. | उत्थानम् | .................. |
| ङ. | अस्मिन् | .................. |

**योग्यताविस्तारः —**

- वीरशिवराजस्य जीवनपरिचयं लिखत पठत च।
- शिवराजसदृशानां वीराणां नामानि लिखत।
- आचार्यसहयोगेन शिवराजविषये लिखितानां संस्कृतपुस्तकानां नामानि लिखत।

*आचार्यदेवो भव।*

# चतुर्दशः पाठः

# देवी अहिल्या

अञ्जना — हरिः ॐ! भ्रातः! भवान् कुतः आगच्छति?

अङ्केशः — भगिनी, मालवप्रदेशतः आगच्छन् अस्मि।



अञ्जना — तव जन्मदेशः मध्यप्रदेशस्य मालवक्षेत्रे वर्तते किम्? तत्र को विशेषः?

अङ्केशः — आम्! विक्रमादित्य-भोजराजाभ्यां पोषिते मालवक्षेत्रे अहिल्यायाः प्रजावात्सल्यम् इति विषयम् अधिकृत्य लेखनप्रतियोगिता आसीत्।

अञ्जना — तर्हि, कथय मे अहिल्यावृत्तम्। श्रोतुम् इच्छामि।

अङ्केशः — सुशीलाबाई-माणकोजी इति अनयोः सुपुत्री आसीत्। अहिल्याबाई महाराष्ट्रस्य चौण्डीग्रामे पञ्चविंशत्युत्तरसप्तदश ख्रिस्ताब्दे (1725) मईमासस्य एकत्रिंशे (31) दिनाङ्के जन्म अलभत।

अञ्जना — नर्मदा-क्षिप्रा-शिवनाचम्बलनदीभिः सम्पन्नस्य मालवक्षेत्रस्य वधूः खण्डेरावस्य पत्नी खलु अहिल्याबाई?

अङ्केशः — आम्! सूबेदार-मल्हाररावस्य पुत्रवधूः मालवप्रजानां सर्वस्वम् आसीत्। अहिल्यायाः व्यक्तित्वं बहुमुखि-प्रतिभासम्पन्नं वर्तते स्म। एषा प्रजावत्सला, धर्मपरायणा, न्यायनिष्ठा महिला आसीत्।



राजवाड़ा

इन्दौरनगरे तस्याः राजवाड़ा क्षेत्रं सुन्दरं पवित्रं च अस्ति। अद्यापि राजवाड़ास्थलम् इन्दौरनगरस्य हृदयमिव प्रेक्षणीयं वर्तते। अत्र देशविदेशेभ्यः यात्रिकाः दर्शनार्थम् आगच्छन्ति।

अञ्जना — स्मरामि तस्याः धर्मनिष्ठाम्। स्वपुत्रस्य मालेरावस्य मरणानन्तरं नर्मदातीरम् इन्दौरसमीपस्थं महेश्वरस्थानं राजधानीं चकार।

अङ्केशः — पुनः पुनः स्मरतु। प्राचीनकालतः अवन्तिकानाम्नी प्रसिद्धा उज्जयिनी, माहिष्मतीनाम्ना प्रशस्तं महेश्वरञ्चेति स्थानद्वयं मालवक्षेत्रे अन्तर्भवति।

अञ्जना — राज्ञा महिष्मता निर्मिता माहिष्मती अधुना 'महेश्वरनगरमेव' अस्ति। अनूपदेशस्य राज्ञः सहस्रार्जुनस्य राजधानी अपि आसीत्।

अङ्केशः — अथ किम्! रामायण-महाभारतग्रन्थयोः बौद्ध-जैनधर्मग्रन्थेषु अपि महेश्वरस्य उल्लेखो वर्तते। कालिदासविरचिते रघुवंशे माहिष्मती-वर्णनमस्ति।



महेश्वरम्

आदिशङ्करमण्डनमिश्रयोः मध्ये शास्त्रार्थचर्चा महेश्वरस्थाने एव अभवत्, एतदेव पुण्यक्षेत्रम् अहिल्यायाः राजधानी च अभवत्।

अञ्जना — अहिल्याबाई धीरा शासनप्रवीणा च आसीत् इति पठितवती।

अङ्केशः — आम्! आम्, सत्यं खलु। तस्याः शासनव्यवस्था अर्थनीतिः रक्षानीतिः विद्याप्रीतिः च विशिष्टा इति ज्ञायते।

अञ्जना — अहो भाग्यं मालवक्षेत्रस्य। जयतु कीर्तिशेषा अहिल्याबाई।

अङ्केशः — जयतु, जयतु लोकमाता अहिल्याबाई।

उभौ — सर्वं सहा जितक्रोधाऽहिल्याबाईति कीर्तिता।
धर्मार्थकाममोक्षेषु निरता राजते सदा॥

## शब्दार्थाः

| | |
|---|---|
| प्रजावात्सल्यम् | — प्रजा प्रेम |
| पञ्चविंशत्युत्तरसप्तदश | — 1725 |
| उत्तरे | - आगे |
| एकत्रिंशः | — 31 |
| अलभत | — पाया / प्राप्त किया |
| सर्वस्वम् | — सब कुछ |
| बहुमुखिप्रतिभासम्पन्नम् | — बहुत प्रकार की प्रतिभा से सम्पन्न |
| विशिष्टा | — अद्वितीय, विशिष्ट |

| | | | |
|---|---|---|---|
| कीर्तिशेषा | —केवल यश के रूप में जीने वाली | धर्मार्थकाममोक्षेषु | — धर्म, अर्थ, काम और मोक्ष में |
| सहा | —धरती (सहन करने वाली) | चतुर्विधपुरुषार्थाः | — चार प्रकार के पुरुषार्थ- धर्म, अर्थ, काम और मोक्ष |
| जितक्रोधा | —क्रोध को जीतने वाली | | |

## अभ्यासः

### 1. एकपदेन उत्तरं लिखत —

क. अहिल्यायाः जन्मग्रामः कः?

ख. अहिल्यायाः व्यक्तित्वं कथं वर्तते?

ग. राजवाड़ा कुत्र अस्ति?

घ. माहिष्मती कस्य राजधानी आसीत्?

ङ. सुशीलाबाई-माणकोजी-इत्यनयोः पुत्री का आसीत्?

### 2. एकवाक्येन उत्तरं लिखत —

क. लेखनप्रतियोगिता कं विषयम् अधिकृत्य आसीत्?

ख. अहिल्याबाई कदा जन्म अलभत?

ग. अहिल्याबाई कीदृशी महिला आसीत्?

घ. महेश्वरस्थानस्य उल्लेखः कुत्र कुत्र वर्तते?

ङ. कीदृशी अहिल्याबाई सदा राजते?

### 3. रेखाङ्कितपदम् आधृत्य प्रदत्तैः शब्दैः प्रश्ननिर्माणं कुरुत—

क. अहं <u>मालवप्रदेशतः</u> आगच्छामि। (कुतः)

ख. अहिल्याबाई <u>खण्डेरावस्य</u> पत्नी आसीत्। (कस्य)

ग. <u>रघुवंशकाव्ये</u> माहिष्मतीवर्णनम् अस्ति। (कुत्र)

घ. अहिल्यायाः विद्याप्रीतिः <u>असामान्या</u> आसीत्। (कथम्)

ङ. <u>राज्ञा महिष्मता</u> निर्मिता माहिष्मती। (केन)

**4. समुचितमेलनं कुरुत—**

| | (अ) | | (ब) |
|---|---|---|---|
| क. | शङ्कर-मण्डनमिश्रयोः शास्त्रचर्चा | – | राजवाड़ा |
| ख. | सर्वं सहा | – | उज्जयिनी |
| ग. | अवन्तिका | – | महेश्वरस्थाने |
| घ. | रघुवंशम् | – | अहिल्याबाई |
| ङ. | इन्दौरनगरे | – | कालिदासरचितम् |

**5. उचितपदेन रिक्तस्थानं पूरयत—**

क. भवान् कुतः ..................। (आगच्छति / आगच्छसि)

ख. माहिष्मतीनाम्ना ............... प्रसिद्धः। (महेश्वरः / उज्जयिनी)

ग. राजवाड़ास्थानं .................. वर्तते। (प्रेक्षणीयं / उपेक्षणीयम्)

**6. भिन्नशब्दं चिनुत —**

क. कुतः, किम्, कुत्र, कथम्, मित्रम्।

ख. श्रोतुम्, गन्तुम्, नेतुम्, समागत्य, ज्ञातुम्।

ग. नर्मदा, क्षिप्रा, शिवना, चम्बल, हिमालयः।

घ. विंशतिः, अशीतिः, नवतिः, षष्ठिः, द्रोणः।

ङ. रामायणम्, महाभारतम्, पुराणम्, काव्यम्, कालिदासः।

**योग्यताविस्तारः —**

- मालवक्षेत्रस्य महेश्वरस्य यात्रां कुर्वन्तु।

*चित्ते कृपा समरनिष्ठुरता च दृष्टा।*

# विविधप्रश्नावलिः - 2

N5Q8T9

1. **प्रश्नानाम् एकपदेन उत्तरं लिखत—**

क. भूमेः गुरुतरा का?

ख. आतुरस्य मित्रं किम्?

ग. वसन्तपञ्चमी कस्य आगमनं सूचयति?

घ. वसन्तोत्सवे कस्याः पूजनं भवति?

ङ. चन्द्रशेखरस्य जन्म कस्मिन् ग्रामे अभवत्?

च. चन्द्रशेखरः कां भाषाम् अधीतवान्?

छ. अस्तसमये सूर्यस्य वर्णः कः भवति?

ज. नरत्वं दुर्लभं कुत्र?

झ. जयन्तः सीताचरणे किं कृतवान्?

ञ. चित्रकूटे जलप्रपातस्य किं नाम?

ट. पुष्पस्रजं कण्ठे कः समर्पयति?

ठ. अहिल्यायाः व्यक्तित्वं कथं वर्तते?

ड. माहिष्मती कस्य राजधानी आसीत्?

2. **प्रश्नानाम् एकवाक्येन उत्तरं लिखत—**

क. युधिष्ठिरस्य मातुः नाम किम्?

ख. प्रसन्नोभूत्वा यक्षः किम् अकरोत्?

ग. ऋतुराजवसन्तस्य आगमनसूचना कदा भवति?

घ. तमिलनाडुराज्ये जनाः शारदां कथम् अर्चयन्ति?

ङ. स्वाधीनतान्दोलने के के चन्द्रशेखरस्य सहायकाः अभवन्?

च. चन्द्रशेखरः कथं वीरगतिं प्राप्नोत्?

छ. वृक्षाणां स्वभावः कीदृशः?

ज. न्याय्यात्पथः पदमपि के न विचलन्ति?

झ. हनुमान्धारा इति नाम कथं प्रसिद्धम्?

ञ. निर्झराः कीदृशाः वर्तन्ते?

ट. धर्मराज्यसंस्थापनार्थं श्रीरामदासेन का आशीः प्रदत्ता?

ठ. शिवराजस्य गुरुः कः आसीत्?

ड. अहिल्याबाई कीदृशी महिला आसीत्?

ढ. अहिल्याबाई कदा जन्म अलभत?

## 3. रेखाङ्कितपदम् आधृत्य प्रश्ननिर्माणं कुरुत —

क. उदयास्तसमये रविः ताम्रवर्णः भवति।

ख. वृक्षाः अन्येभ्यः छायां कुर्वन्ति।

ग. न्याय्यात्पथः पदं न प्रविचलन्ति धीराः ।

घ. वर्जयेत् तादृशं मित्रम्।

ङ. विविधैः पुष्पैः ऋतुराजस्य स्वागतं भवति।

च. पुस्तकानाम् अपि पूजनं भवति।

छ. शारदाम् अर्चयन्ति।

ज. रामघट्टः मन्दाकिन्याः तटे अस्ति।

झ. सः प्रातः विद्यालयं गच्छति।

ञ. एषः मम अग्रजः अस्ति।

ट. चित्रकूटं सतना मण्डले अस्ति।

ठ. अहं मालवप्रदेशतः आगच्छामि।

ड. राज्ञा महिष्मता निर्मिता माहिष्मती।

ढ. रघुवंशे माहिष्मतीवर्णनम् अस्ति।

## 4. कोष्ठकात् उचितानि पदानि चित्वा रिक्तस्थानानि पूरयत—

क. माता ............... गुरुतरा अस्ति। (भूमिः / भूमेः)

ख. ............... भिषङ्मित्रं भवति। (आतुरः / आतुरस्य)

ग. वसन्तपञ्चमी ............... नाम्ना अपि ज्ञायते। (श्रीपञ्चमी / ऋषिपञ्चमी)

घ. चन्द्रशेखरस्य पितुः नाम ................ आसीत्। (सीतारामः / दयारामः)

ङ. चित्रकूटे रामचन्द्रः ................ यावत् निवासं कृतवान्। (चतुर्दशवर्षाणि/एकादशवर्षाणि)

च. भवान् कुतः ............। (आगच्छति/आगच्छसि)

छ. राजवाड़ास्थानं ................. वर्तते। (उपेक्षणीयम्/प्रेक्षणीयम्)

## 5. अधोनिर्दिष्टैः अव्ययैः वाक्यानि रचयत—

कदा, च, तत्र, विना, अत्र, अद्य, तु

6. **नामोल्लेखपूर्वकं सन्धिं कुरुत—**

| सन्धिविच्छेदः | सन्धिशब्दः | सन्धिनाम |
|---|---|---|
| क. शक्तिः + तत्र | ........................ | ........................ |
| ख. षट् + एते | ........................ | ........................ |
| ग. अत्र + एव | ........................ | ........................ |
| घ. किम् + अर्थम् | ........................ | ........................ |
| ङ. कालात् + एव | ........................ | ........................ |
| च. अहः + निशम् | ........................ | ........................ |
| छ. खादन् + अपि | ........................ | ........................ |

7. **लकार परिवर्तनं कुरुत—**

| | लट् | लोट् |
|---|---|---|
| क. | रक्षति | ...................... |
| ख. | .................... | रक्षाणि |
| ग. | गच्छसि | ...................... |
| घ. | ........................ | गच्छाम |
| ङ. | ....................... | पिबन्तु |
| च. | .......................... | पिबत |
| छ. | शृणुथः | ....................... |
| ज. | याचतः | ...................... |
| झ. | ......................... | स्मराम |
| ञ. | पचन्ति | ........................ |

8. **उचितं मेलयत—**

| | (अ) | | (ब) |
|---|---|---|---|
| क. | मरिष्यतः मित्रम् | – | भार्या |
| ख. | गृहे मित्रम् | – | भ्रमराः दृश्यन्ते |
| ग. | मञ्जरीं परितः | – | दानम् |
| घ. | चन्द्रशेखरेण अधीतम् | – | वेत्रप्रहारैः |
| ङ. | सर्वाः | – | संस्कृतम् |
| च. | चन्द्रशेखरः मूर्च्छितः | – | विद्याः |

छ. शङ्कर-मण्डनमिश्रयोः शास्त्रचर्चा – राजवाड़ा

ज. इन्दौरनगरे – महेश्वरस्थाने

### 9. पूर्तिं कुरुत—

क. उद्यमं ........................धैर्यं, ........................ पराक्रमः।
........................... वर्तन्ते, ............................ सहायकः॥

ख. उदये ........................ ताम्रः, .........................तथा।
सम्पत्तौ च ..................... च, .........................।

### 10. अधोलिखितगद्यांशं पठित्वा उत्तराणि लिखत—

प्राचीनकाले वसन्तपञ्चम्यां ज्ञानयज्ञतपस्वरूपां सरस्वतीं जनाः पूजयन्ति स्म। अधुना अपि सम्पूर्णे देशे आध्यात्मिकजिज्ञासया अस्मिन् दिने जनाः ज्ञानस्य अधिष्ठात्रीं शारदां पूजयन्ति। वसन्तोत्सवः वस्तुतः सांस्कृतिकः उत्सवः अस्ति। वैदिककालात् एव अस्मिन् दिने सरस्वत्याः उपासना भवति।

क. प्राचीनकाले वसन्तपञ्चम्यां जनाः कां पूजयन्ति स्म?

ख. अधुना जनाः वसन्तपञ्चम्यां देशे कां पूजयन्ति?

ग. वसन्तोत्सवः कीदृशः उत्सवः अस्ति?

घ. कस्मात् कालात् वसन्तपञ्चम्यां सरस्वती उपासना भवति?

(अथवा)

अङ्केशः — पुनः पुनः स्मरतु। प्राचीनकालतः अवन्तिकानाम्ना प्रसिद्धा उज्जयिनी, माहिष्मतीनाम्ना प्रशस्तः महेश्वरश्चेति स्थानद्वयं मालवक्षेत्रे अन्तर्भवति।

अञ्जना — राज्ञा महिष्मता निर्मिता माहिष्मती महेश्वरनगरमेव अस्ति। अनूपदेशस्य राज्ञः सहस्त्रार्जुनस्य राजधानी अपि आसीत्।

क. उज्जयिन्याः अपरं नाम किम्?

ख. महेश्वरस्य अपरं नाम किम्?

ग. सहस्त्रार्जुनः कस्य देशस्य नृपः आसीत्?

घ. सहस्त्रार्जुनस्य राजधानी कस्मिन् नगरे आसीत्?

**11. अधोलिखितं पद्यं पठित्वा उत्तराणि लिखत—**

उदये सविता ताम्रस्ताम्र एवास्तमेति च।
सम्पत्तौ च विपत्तौ च महतामेकरूपता॥

क. उदये सवितुः वर्णः कः भवति?

ख. अस्तङ्गते सवितुः कः वर्णः भवति?

ग. सम्पत्तौ विपत्तौ च केषाम् एकरूपता?

घ. उदये इति पदे का विभक्तिः अस्ति?

अथवा

माता गुरुतरा भूमेः खात्पितोच्चतरस्तथा।
मनः शीघ्रतरं वाताच्चिन्ता बहुतरी तृणात्॥

क. भूमेः गुरुतरा का?

ख. पिता कस्मात् उच्चतरः?

ग. वातात् शीघ्रतरं किम्?

घ. तृणात् बहुतरी का?

**12. उचितविकल्पं चित्वा लिखत—**

क. वसन्तपञ्चमी पर्व भवति।

(फाल्गुनमासे / चैत्रमासे / माघमासे / कार्तिकमासे)

ख. चन्द्रशेखरस्य जन्म अभवत्।

(जुलाईमासे / मईमासे / अगस्तमासे / जूनमासे)

ग. सम्पतौ च विपत्तौ च महतां भवति।

(अनेकरूपता / भिन्नरूपता / एकरूपता / विविधरूपता)

घ. 'सत् + आचारः' अस्ति।

(स्वरसन्धिः / व्यञ्जनसन्धिः / विसर्गसन्धिः / प्रकृतिभावसन्धिः)

ङ. विद्यालयः अस्ति।

(अव्ययीभावसमासः / तत्पुरुषसमासः / द्वन्द्वसमासः / द्विगुसमासः)

च. अहिल्याबाई इत्यस्य पत्युः नाम आसीत्। (दामोदररावः/खण्डेरावः/ मल्हाररावः/कृष्णरावः)

## पञ्चदशः पाठः

# कूटश्लोकाः

A3G3Q4

### कूटश्लोकौ

एकचक्षुः न काकोऽयं बिलमिच्छन्नपन्नगः।
क्षीयते वर्धते चैव न समुद्रो न चन्द्रमाः॥1॥

एकं चक्षुः अस्ति परन्तु काकः नास्ति, बिलम् अन्विष्यति परन्तु पन्नगः नास्ति, क्षयः भवति वृद्धिरपि भवति परन्तु समुद्रः नास्ति चन्द्रोऽपि नास्ति। तर्हि एतत् किम्?

कृष्णमुखी न मार्जारी द्विजिह्वा न च सर्पिणी।
पञ्चभर्त्री न पाञ्चाली यो जानाति स पण्डितः॥2॥

मुखभागः कृष्णवर्णः वर्तते किन्तु कृष्णवर्णा मार्जारी नास्ति, द्वे जिह्वे भवतः किन्तु सर्पिणी नास्ति, पञ्च पतयः सन्ति किन्तु पाञ्चाली नास्ति। तर्हि किम् अस्ति? यः जानाति सः पण्डित एव।

### कूटश्लोकः (प्रश्नोत्तरम्)

कं सञ्जघान कृष्णः का शीतलवाहिनी गङ्गा।
के दारपोषणरताः कं बलवन्तं न बाधते शीतम्॥3॥

| | | |
|---|---|---|
| कृष्णः कं जघान? | .............................. | कंसम् |
| शीतलवाहिनी का? | ............................ | काशीतलवाहिनी गङ्गा |
| दारपोषणरताः के? | ............................ | केदारपोषणरताः |
| शीतं कं न बाधते? | ............................ | कम्बलवन्तम् बलवन्तम् |

### सङ्ख्याकूटश्लोकः

एकोनाविंशतिः स्त्रीणां स्नानार्थं नर्मदां गताः विंशतिः।

पुनरायाता एको व्याघ्रेण भक्षितः।।4।।

स्त्रीणाम् एकोनाविंशतिः (19) स्नानार्थं नर्मदां गता व्याघ्रेण एको भक्षितः (19 – 1 = 18) विंशतिः (20) पुनरायाताः! .................... ?

एकः ना स्त्रीणां विंशतिः (1 + 20 = 21) स्नानार्थं नर्मदां गताः। व्याघ्रेण एकः भक्षितः विंशतिः पुनः आयाता (21 – 1 = 20)

---

**उत्तरम्** — 1 सूची, 2 लेखनी

## समासकूटेन चमत्कारः

अहं च त्वं च राजेन्द्र लोकनाथावुभावपि।
बहुव्रीहिरहं राजन् षष्ठी तत्पुरुषो भवान्॥5॥

(एकः भिक्षुकः दरिद्रः / निर्धनः महाराजम् उद्दिश्य ब्रूते)
हे राजेन्द्र! अहं त्वं च उभौ अपि लोकनाथौ (स्वः) अहं बहुव्रीहिः भवान् षष्ठीतत्पुरुषः।
लोकः नाथः यस्य सः (भिक्षुकः) लोकस्य नाथः (राजा)।

द्वन्द्वो द्विगुरपि चाहं मद्गृहे नित्यम् अव्ययीभावः।
तत्पुरुष कर्मधारय येनाहं स्यां बहुव्रीहिः॥6॥

द्वन्द्व-द्विगु-अव्ययीभाव-तत्पुरुष-कर्मधारय-बहुव्रीहिसमासभेदान् आश्रित्य अत्र कूटश्लोके निर्धनस्य धनप्राप्त्यै पत्न्याः प्रार्थनायाः अद्भुतः सामाजिकः भावः निबद्धः। अत्र पत्नी धनार्जनाय अकर्मण्यं भर्तारं प्रेरयति।

(द्वन्द्वः- अहं भवता सह कलहं करोमि किल? किमर्थम्?
द्विगुः- अहं भवतः भार्या अस्मि। मम पालनं पोषणं भवतः कर्त्तव्यम् अस्ति किन्तु-
(मद्गृहे नित्यम्)
अव्ययीभावः- प्रतिदिनं गृहे भोजनार्थम् किमपि नास्ति।
तत्पुरुष अतः हे पतिदेव! कमपि उद्योगं कुरु।
कर्म+धारय धनधान्यादिकं गृहमानय येन कारणेन (येनाहं स्याम्)
बहुव्रीहिः- अहमपि धनधान्यसम्पन्ना भवेयम्।)

शङ्करं पतितं दृष्ट्वा पार्वती हर्षनिर्भरा।
रुरुदुः पन्नगाः सर्वे हा हा शङ्कर शङ्कर॥7॥

अत्रापि श्लेष द्वारा अर्थः बोध्यः। शङ्करं पतितं दृष्ट्वा पार्वती प्रसन्ना भवति, सर्वाः दुःखिताः जाताः। अत्र शङ्करशब्दे पार्वतीशब्दे च श्लेषः। सर्पाः शीतलं चन्दनवृक्षं आलिङ्‌य मिलन्ति सः चन्दनवृक्षः प्रकृतिविकोपेन पतितः अतः निराश्रिताः पन्नगाः रुदन्ति तथा भिल्लस्त्री(मलयपर्वते) चन्दनवृक्षबाहुल्यात् चन्दनवृक्षकाष्ठम् इन्धनाय-उपयुक्ते।
भिल्लस्त्री(पार्वती) पतितं चन्दनवृक्षं दृष्टवा इन्धनं लब्धमिति हर्षनिर्भरा जाता।
शङ्करः- शिवः चन्दनवृक्षः च, पार्वतीः- गौरी भिल्लस्त्री च

कस्तूरी जायते कस्मात् को हन्ति करिणां कुलम्।
किं कुर्यात् कातरो युद्धे मृगात् सिंहः पलायनम्॥8॥

अत्र चरणत्रये त्रयः प्रश्नाः चतुर्थे चरणे त्रयाणाम् एव उत्तरं वर्तते। कस्तूरी कस्मात् जायते इति प्रथमः प्रश्नः 'करिणां कुलं कः हन्ति' इति द्वितीयः प्रश्नः कातरः युद्धे किं कुर्यात् इति तृतीयः प्रश्नः।

## शब्दार्थाः

| | | |
|---|---|---|
| चक्षुः | — | नेत्र |
| पन्नगः | — | सर्प |
| बिलम् | — | छेद |
| जिह्वा | — | जीभ |
| पञ्चभर्त्री | — | पाँच पतियों वाली |
| पाञ्चाली | — | द्रौपदी |
| जघान | — | मारा |
| शीतलवाहिनी | — | शीतल जल वाली |
| दारपोषणरताः | — | पत्नी के पोषण में तत्पर |
| केदारपोषणरताः | — | खेत सँवारने में संलग्न (कृषक) |
| कम्बलवन्तम् | — | किस बलवान् को |
| ना | — | पुरुषः/नरः |
| एकोनाविंशतिः | — | 19 |
| विंशतिः | — | 20 |
| लोकनाथः | — | भिक्षुक/राजा। बहुव्रीहिः। सर्वोऽपि लोकः भिक्षुकस्य नाथः लोकस्य नाथः। |
| लोकस्य नाथः | — | षष्ठीतत्पुरुषसमासे कृते राजा इत्यर्थः। |
| द्वन्द्वः | — | द्वन्द्व समास, कलह |
| द्विगुः | — | द्विगुसमास, दम्पति (पति-पत्नी) |
| अव्ययीभाव | — | समास, धनाभाव (निर्धनता) |
| तत्पुरुषः | — | समास, पति |
| कर्मधारय | — | समास, अकर्मण्यता छोड़कर कर्म करो। |
| बहुव्रीहिः | — | समास, धनधान्ययुक्त |
| शङ्करम् | — | शङ्कर भगवान को/ चन्दन के पेड़ को |
| पतितम् | — | गिरते हुए |
| पार्वती | — | पार्वती शिवपत्नी/ पर्वतनिवासिनी भीलनी |
| कस्तूरी | — | कस्तूरी (गन्धविशेष) |
| जायते | — | उत्पन्न होती है। |
| हन्ति | — | मारता है |
| करिणां कुलम् | — | हाथियों के समूह को |
| कातरः | — | दुःखी |
| युद्धे | — | युद्ध में |

## अभ्यासः

1. **एकपदेन उत्तरं लिखत—**

   क. प्रथमायाः प्रहेलिकायाः उत्तरं किम्?
   ख. वयं कया लिखामः?
   ग. कंसं कः सञ्जघान?
   घ. कम्बलवन्तं किं न बाधते?
   ङ. कति स्त्रियः स्नानार्थं नर्मदां गताः?
   च. करिणां कुलं को हन्ति?

## 2. एकवाक्येन उत्तरं लिखत—

क. लेखन्याः स्वरूपं किम्?

ख. सूच्याः किं लक्षणम्?

ग. काशीतलवाहिनी का?

घ. शीतं कं न बाधते?

ङ. नर्मदायाः कति स्त्रियः पुनरायाताः?

च. शङ्करं पतितं दृष्ट्वा पार्वती कीदृशी भवति?

## 3. युग्ममेलनं कुरुत—

| | (अ) | (ब) |
|---|---|---|
| क. | कंसं जघान | भिक्षुकः |
| ख. | शीतलवाहिनी | राजा |
| ग. | लोकः नाथः यस्य सः | कृष्णः |
| घ. | कातरः युद्धे कुर्यात् | मृगात् |
| ङ. | लोकस्य नाथः | कम्बलवन्तम् |
| च. | शीतं न बाधते | गङ्गा |
| छ. | कस्तूरी कस्मात् जायते | पलायनम् |

## 4. रिक्तस्थानानि पूरयत—

क. कंसं जघान ......................।

ख. कं बलवन्तं ..................... शीतम्।

ग. तत्पुरुष ..................... येनाहं स्यां बहुव्रीहिः।

घ. .............. पतितं दृष्ट्वा पन्नगाः रुरुदुः।

ङ. मद्गेहे नित्यम् .................।

## 5. द्व्यर्थकशब्दानाम् अर्थं लिखत—

| | शब्दः | अर्थः |
|---|---|---|
| क. | शङ्करम् | .................. |
| ख. | द्वन्द्वः | .................. |
| ग. | बहुव्रीहिः | ................... |
| घ. | कं बलवन्तम् | .................. |
| ङ. | लोकनाथः | .................. |
| च. | अव्ययीभावः | .................. |
| छ. | द्विगुः | .................. |
| ज. | कर्मधारय | .................... |
| झ. | एको ना विंशतिः | .................... |
| ञ. | पञ्चभर्त्री | ..................... |

## योग्यताविस्तारः —

- एवमेव अन्यान् कूटश्लोकान् प्रहेलिकाः च अन्वेषयत।

*कूटोक्तिः वाग्वैचित्र्यम्।*

षोडशः पाठः

# कवित्वं कालिदासस्य



महाकविः कालिदासः संस्कृतसाहित्यस्य सर्वश्रेष्ठः कविरस्ति। तेन विरचितानि मालविकाग्निमित्रम्, विक्रमोर्वशीयम्, अभिज्ञानशाकुन्तलम् चेति त्रीणि नाटकानि सन्ति। एतेषु नाटकेषु अभिज्ञानशाकुन्तलं तु न केवलं संस्कृतसाहित्यस्य अपितु विश्वस्य सर्वश्रेष्ठं नाटकमस्ति।

उच्यते यत्—

"काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला।"

शाकुन्तलनाटकस्य वैशिष्ट्यविषये जर्मनकवेः गेटे महोदयस्य भावं द्योतयता एकेन विदुषा कथितं यत्—

"एकीभूतमभूतपूर्वमथवा स्वर्लोकभूलोकयोः
ऐश्वर्यं यदि वाञ्छसि प्रियसखे! शाकुन्तलं सेव्यताम्॥"

सप्त-अङ्कात्मके नाटकेऽस्मिन् दुष्यन्तशकुन्तलयोः कथा तथा तयोः शिशोः भरतस्य शौर्यं वर्णितम्। तस्य भरतस्य नाम्ना एव अस्माकं देशस्य नाम "भारतवर्षम्" इति प्रसिद्धम् अस्ति। नाटकेऽस्मिन् भरतवाक्यमाध्यमेन महाकविः कथयति—

"प्रवर्ततां प्रकृतिहिताय पार्थिवः सरस्वतीश्रुतिमहतीमहीयताम्।
ममापि च क्षपयतु नीललोहितः, पुनर्भवं परिगतशक्तिरात्मभूः॥"

मालविकाग्निमित्रनाटकं पञ्चाङ्कात्मकमस्ति। अत्र मालविका-अग्निमित्रयोः कथा वर्णितास्ति। विक्रमोर्वशीयनाटके उर्वशी-पुरूरवयोः कथा पञ्चाङ्केषु वर्णिता। अस्मिन् नाटके भरतवाक्यमाध्यमेन कामयते कविः यत्—

"सर्वस्तरतु दुर्गाणि, सर्वो भद्राणि पश्यतु।
सर्वः कामानवाप्नोतु, सर्वः सर्वत्र नन्दतु॥"

तस्य कुमारसम्भवम्, रघुवंशम् चेति नामके द्वे महाकाव्ये प्रसिद्धे स्तः। कुमारसम्भवमहाकाव्ये सप्तदशसर्गेषु स्वामिकार्तिकेयस्य अवतारकथा तारकासुरस्य वधवृत्तान्तञ्चास्ति। रघुवंशमहाकाव्ये नवदशसु सर्गेषु रघुवंशीयानां पराक्रमवर्णनं तथा तेषाम् उदात्तचरित्रनिरूपणं तेन कृतम्।

तेन मेघदूतम् ऋतुसंहारञ्च द्वे खण्डकाव्ये विरचिते। मेघदूते पूर्वमेघः उत्तरमेघश्चेति द्वौ भागौ स्तः। अस्मिन् काव्ये मेघः यक्षस्य दूतः अभवत्। सः मेघः दूतरूपेण रामगिरितः हिमालयस्थाम् अलकापुरीं गच्छति। दूतमार्गस्य वर्णनं नैसर्गिकम् अतीवरमणीयं चास्ति।

ऋतुसंहारे षड्ऋतूणां प्राकृतिकसौन्दर्यं मनोवैज्ञानिकञ्च वर्णितम्। कालिदासस्य उपमा विश्वप्रसिद्धा। उच्यते च "उपमा कालिदासस्य।" कथावर्णने चरित्रचित्रणे च सः प्रवीणः। तस्य वर्णनशैली सरसा-सरला परिष्कृता चास्ति। तस्य भाषा भावानुगामिनी।

भार्या विद्योत्तमा तस्य परोक्षप्रेरिका आसीत् परन्तु एषः कालिदासः परवर्तिसाहित्योपासकानां कविकुलगुरुः अस्ति। कालिदासस्य ग्रन्थानामनुवादः प्रायः विश्वस्य सर्वासु भाषासु सञ्जातः।

उज्जयिनी तस्य जन्मस्थली इति केचित् अन्ये विदर्भमपि मन्यन्ते वैदर्भीरीतितर्केण मेघदूतप्रमाणेन च। अद्यापि उज्जयिन्याम् अन्यत्र च प्रतिवर्षं देवप्रबोधिन्यां कालिदास-महोत्सवः विशिष्टरूपेण आयोज्यते। यतः तस्य मेघदूते यक्षस्य शापमोक्षः देवप्रबोधिन्यामेव जातः। यक्षव्याजेन महाकविः आत्मव्यथां प्रस्तुतवान् इति विदुषां मतम्। अतः देवप्रबोधिनी तिथिः महाकवेः उत्सवदिवसः न तु जन्मदिवसः। जन्मदिवसस्तु शोधविषयो वर्तते।

अपि च उक्तम्—

पुरा कवीनां गणनाप्रसङ्गे कनिष्ठिकाधिष्ठितकालिदासः।
अद्यापि तत्तुल्यकवेरभावादनामिका सार्थवती बभूव।।

## शब्दार्थाः

भरतवाक्यम् — नाटक के अन्त में सूत्रधार द्वारा कथित आशीर्वचन

प्रवर्तताम् — प्रवृत्त हों

प्रकृतिहिताय — सर्वहित हेतु

पार्थिवः — राजा

सरस्वतीश्रुतिमहती महीयताम्— श्रुतिस्वरूपा महान् (महती) सरस्वती देवी (अर्थात् सत्साहित्य) की प्रतिष्ठा होवे

परवर्तीसाहित्योपासकानाम् — उत्तरकालीन साहित्यकारों के

दुर्गाणि — कष्टों को

नीललोहितः — नील और गाढ़े लाल वर्ण वाले शिवजी

कामानवाप्नोतु — (कामान् + अवाप्नोतु) इच्छाओं को प्राप्त करें

क्षपयतु — नष्ट करें

परिगत शक्तिः — व्यापक शक्ति

नन्दतु — प्रसन्न हों

आत्मभूः — स्वयम् उत्पन्न

अवतारः — जन्म

वधवृत्तान्तम् — वध की कथा

एकीभूतमभूतपूर्वमथवा — (एकीभूतम् + अभूतपूर्वम् + अथवा)

एकीभूतम् — एकत्रीकरण

| | | | |
|---|---|---|---|
| अभूतपूर्वम् | — जो पहले कभी नहीं हुआ | तत्तुल्य | — उसके समान |
| स्वर्लोकभूलोकयोः | — स्वर्गलोक एवं भूलोक दोनों का | कवेः | — कवि के |
| वाञ्छसि | — चाहते हो | अभावात् | — अभाव से |
| सेव्यताम् | — सेवन कीजिए | सार्थवती | — सार्थक |
| कनिष्ठिकाधिष्ठित | — (कनिष्ठिका + अधिष्ठित) | बभूव | — हुई |
| परिष्कृता | — अलंकृत | अनामिका | — कनिष्ठिका से द्वितीय क्रम की अंगुली/बिना नाम वाली |
| अन्यतमः | — श्रेष्ठ | भावानुगामिनी | — भावों का अनुगमन करने वाली |
| कनिष्ठिका | — सबसे छोटी अँगुली | अधिष्ठित | — स्थापित |

## अभ्यासः

1. **एकपदेन उत्तरं लिखत—**

   क. काव्येषु किं रम्यम्?

   ख. दुष्यन्तशकुन्तलयोः पुत्रस्य किं नाम?

   ग. अभिज्ञानशाकुन्तलनाट्ये कति अङ्काः सन्ति?

   घ. मेघदूतस्य कविः कः?

   ङ. रघुवंशमहाकाव्ये कति सर्गाः सन्ति?

   च. कालिदासेन कति नाटकानि विरचितानि?

2. **एकवाक्येन उत्तरं लिखत—**

   क. कालिदासेन विरचितानां नाट्यग्रन्थानां नामानि लिखत?

   ख. अस्माकं देशस्य नाम ''भारतवर्षम्'' इति कथं प्रसिद्धम्?

   ग. ऋतुसंहारे केषां वर्णनम् अस्ति?

   घ. कालिदासेन विरचितमहाकाव्यद्वयस्य नाम लिखत?

   ङ. कालिदासेन विरचितखण्डकाव्यद्वयस्य नाम लिखत?

   च. कालिदास-महोत्सवः कदा आयोज्यते?

### 3. उचितशब्देन रिक्तस्थानं पूरयत—

क. प्रवर्तताम् ................ पार्थिवः। (स्वहिताय/प्रकृतिहिताय)

ख. सर्वः .................. नन्दतु। (अन्यत्र/सर्वत्र)

ग. सर्वो ................ पश्यतु। (अभद्राणि/भद्राणि)

घ. काव्येषु .................रम्यम्। (कथा/नाटकं)

ङ. .................. सार्थवती बभूव। (कनिष्ठिका/अनामिका)

### 4. उचितं योजयत—

| | (अ) | | (ब) |
|---|---|---|---|
| क. | सर्वश्रेष्ठनाटकम् | – | ऋतुसंहारम् |
| ख. | महाकाव्यम् | – | विक्रमोर्वशीयनाट्ये |
| ग. | खण्डकाव्यम् | – | कुमारसम्भवम् |
| घ. | दूतरूपेण मेघस्य यात्रारम्भः | – | नन्दतु |
| ङ. | पुरुरवा इत्यस्य वर्णनम् | – | अभिज्ञानशाकुन्तलम् |
| च. | सर्वः सर्वत्र | – | रामगिरितः |

### 5. शुद्धवाक्यानां समक्षम् ''आम्'' अशुद्धवाक्यानां समक्षं ''न'' इति लिखत—

क. अभिज्ञानशाकुन्तलनाटके सप्त-अङ्काः सन्ति।

ख. 'सरस्वतीश्रुतिमहतीमहीयताम्' विक्रमोर्वशीयनाट्यस्य भरतवाक्यम् अस्ति।

ग. 'सर्वः सर्वत्र नन्दतु' इति भरतवाक्यम् अभिज्ञानशाकुन्तलस्य अस्ति।

घ. कालिदासस्य उपमा विश्वप्रसिद्धा अस्ति।

ङ. गणनाप्रसङ्गे कालिदासः अनामिकाधिष्ठितः अस्ति।

च. कालिदासस्य भार्यायाः नाम विद्योत्तमा अस्ति।

छ. कालिदासमहोत्सवः देवप्रबोधिन्याम् आयोज्यते।

ज. कुमारसम्भवं खण्डकाव्यम् अस्ति।

झ. मालविकाग्निमित्रनाटके सप्त-अङ्काः सन्ति।

ञ. ऋतुसंहारं महाकाव्यम् अस्ति।

## 6. नामोल्लेखपूर्वकं सन्धिविच्छेदं कुरुत—

क. चेति
ख. कविरस्ति
ग. नाटकेऽस्मिन्
घ. अद्यापि
ङ. सर्वस्तरतु
च. सत्यमेव

## 7. नामोल्लेखपूर्वकं समासविग्रहं कुरुत—

क. वर्णनशैली
ख. शास्त्रपारङ्गतः
ग. कालिदासमहोत्सवः
घ. साहित्योपासकाः
ङ. गणनाप्रसङ्गे

## 8. स्थूलपदान्यधिकृत्य प्रश्ननिर्माणं कुरुत—

क. <u>कालिदासस्य</u> उपमा विश्वप्रसिद्धा।
ख. <u>तेन</u> मेघदूतं विरचितम्।
ग. <u>कालिदासः</u> सर्वश्रेष्ठः कविरस्ति।
घ. <u>मेघः</u> दूतरूपेण अलकापुरीं गच्छति।
ङ. यक्षव्याजेन <u>महाकविः</u> आत्मव्यथाम् प्रस्तुतवान्।

## योग्यताविस्तारः —

- कालिदासस्य साहित्यस्य अध्ययनं कुरुत।
- अभिज्ञानशाकुन्तलनाट्यस्य तथा विक्रमोर्वशीयनाट्यस्य भरतवाक्यं कण्ठस्थं कुरुत।
- कालिदासमहोत्सवे स्वकीयसहभागितां निर्धारयत।
- निम्नलिखितस्य श्लोकस्य लयबद्धगानं कुरुत —

  वासन्तं कुसुमं फलञ्च युगपद् ग्रीष्मस्य सर्वञ्च यद्—
  यच्चान्यन्मनसो रसायनमतः सन्तर्पणं मोहनम्।
  एकीभूतमभूतपूर्वमथवा स्वर्लोकभूलोकयोः
  ऐश्वर्यं यदि वाञ्छसि प्रियसखे! शाकुन्तलं सेव्यताम्॥

- संस्कृतभाषायां पञ्चाङ्गुलीनां क्रमशः नामानि लिखत।

**उपमा कालिदासस्य।**

## सप्तदशः पाठः

# सत्कर्म एव धर्मः

J6N6B9

एकदा विक्रमादित्यः नगरभ्रमणसमये एकं मरणासन्नं रुग्णं दृष्टवान्। तस्य दर्शनेन मनसि वैराग्यम् उद्भूतम्। अतः मायामोहमयं संसारं ज्ञात्वा सः महामन्त्रिणि राज्यभारं समर्प्य वनम् अगच्छत्।

वने सः कठिनां तपस्याम् आरब्धवान्। तस्य समीपे एव एकः महात्मा अपि तपस्यारतः आसीत्। महात्मा तम् अवदत्, ''राजन्! भवान् तु यथानीतिः राजधर्मस्य पालनं करोतु। धर्मानुकूलं शासनम् अपि धर्म एव भवति'' इति स महात्मा विक्रमादित्यम् उपदिष्टवान्। विक्रमः अवदत्– ''नहि महात्मन्! तपसा एव परलोकः साध्यते, कर्मणा नेति।'' महात्मा अवदत्, ''राजन! राज्ञः धर्मः प्रजापालनं, शासनम् एव अस्ति तपस्या तु महात्मनां कर्म इति।'' इत्युक्त्वा महात्मा राजानं पृष्टवान् – कर्म-तपस्ययोः कः भेदः?

राजा अवदत्– कर्मणः स्थानं भिन्नं परं तपस्या स्वर्गप्राप्तेः साधनम्। एतच्छ्रुत्वा महात्मा हसन् अवदत्– ''राजन्! मनुष्यः उत्तमानि कर्माणि कृत्वा अपि परलोकं साधयितुं शक्नोति।'' अनन्तरं महात्मा योगबलेन तत्रैव यमलोकस्य दृश्यं विक्रमं दर्शितवान्। दृश्ये यमराजः दूतान् पृच्छति– ''एतस्य कर्म कीदृशम्?'' एकः दूतः अवदत्– ''कर्मणां लेखनं तु चित्रगुप्तस्य पार्श्वे अस्ति।'' क्षणं विचार्य यमराजः दूतान् आदिष्टवान् यत्– ''यदि एतस्य कर्माणि उत्तमानि सन्ति तर्हि स्वर्गस्य द्वारम् उद्घाटयतु यदि कर्माणि अधमानि, तदा बलात् नरके पातयतु।

इदं दृश्यं दृष्ट्वा विक्रमः ज्ञातवान् यद्– 'सदाचारः एव तपस्या, सत्कर्म एव धर्म' इति। अनन्तरं सः तं महात्मानं प्रणम्य, श्रेष्ठाचरणस्य प्रतिज्ञां कृत्वा राजधानीम् उज्जयिनीम् आगतवान्। आगत्य धर्मानुकूलं नीतिपूर्वकं प्रजापालनपुरस्सरं शासनं कृतवान्। सः अद्यापि लोके सत्कर्मणा एव प्रसिद्धः। तस्य जीवनस्य ध्येयवाक्यम् आसीत्— 'सत्कर्म एव धर्मः।'

### शब्दार्थाः

| | | | | | |
|---|---|---|---|---|---|
| बलात् | — | बलपूर्वक | एतच्छ्रुत्वा | — | ऐसा सुनकर |
| पार्श्वे | — | पास में | साधयितुम् | — | सिद्ध करने के लिए |
| मरणासन्नम् | — | मृत्यु के निकट वाले को | प्रजापालनपुरस्सरम् | — | प्रजापालन को प्रमुखता देते हुए |
| उद्भूतम् | — | उत्पन्न हुआ | पातयतु | — | गिराओ |

## अभ्यासः

1. **एकपदेन उत्तरं लिखत—**

क. विक्रमादित्यः नगरभ्रमणसमये किं दृष्टवान्?

ख. विक्रमादित्यः महामन्त्रिणि राज्यभारं समर्प्य कुत्र अगच्छत्?

ग. महात्मा कस्य समीपे तपस्यारतः आसीत्?

घ. महात्मा योगबलेन तत्र कस्य दृश्यं दर्शितवान्?

ङ. कर्मणां लेखनं कस्य पार्श्वे अस्ति?

च. श्रेष्ठाचरणस्य प्रतिज्ञां कृत्वा विक्रमादित्यः कुत्र आगतवान्?

2. **एकवाक्येन उत्तरं लिखत—**

क. महात्मा विक्रमादित्यं किम् उपदिष्टवान्?

ख. कर्म-तपस्ययोः कः भेदः?

ग. विक्रमादित्यः अन्ते किं ज्ञातवान्?

घ. विक्रमादित्यः लोके कथं प्रसिद्धः?

ङ. विक्रमादित्यस्य ध्येयवाक्यं किम् आसीत्?

च. विक्रमादित्यस्य मनसि केन वैराग्यम् उद्भूतम्?

छ. "सत्कर्म एव धर्मः" कथायाः सारः कः?

3. **रिक्तस्थानानि पूरयत—**

क. विक्रमादित्यस्य समीपे एकः .................. तपस्यारतः आसीत्। (महात्मा / दुरात्मा)

ख. तपस्या .................... साधनम्। (स्वर्गप्राप्तेः / राज्यप्राप्तेः)

ग. यमराजः ................... आदिष्टवान्। (विक्रमादित्यम् / दूतान्)

घ. वने सः कठिनां .................... आरब्धवान्। (दिनचर्याम् / तपस्याम्)

ङ. प्रजापालनं धर्मः .................... अस्ति। (तपस्वीनाम् / राज्ञाम्)

4. **उचितं मेलयत—**

| | अ | | ब |
|---|---|---|---|
| क. | सदाचारः एव | – | धर्मः |
| ख. | महात्मा उपदिष्टवान् | – | परलोकः साध्यते |
| ग. | तपसा | – | सत्कर्म एव धर्मः |
| घ. | विक्रमादित्यस्य ध्येयवाक्यम् | – | विक्रमादित्यम् |
| ङ. | सत्कर्म एव | – | तपस्या |

5. नामोल्लेखपूर्वकं समासविग्रहं कुरुत—

क. ध्येयवाक्यम्
ख. तपस्यारतः
ग. प्रजापालनम्
घ. योगबलेन
ङ. श्रेष्ठाचरणेन

6. नोमोल्लेखपूर्वकं सन्धिविच्छेदं कुरुत—

क. धर्मानुकूलम्
ख. नेति
ग. सदाचारः
घ. अद्यापि
ङ. विक्रमादित्यः

7. रेखाङ्कितशब्दानाम् आधारेण प्रश्ननिर्माणं कुरुत—

क. विक्रमः अवदत्।
ख. तपस्या तु महात्मनां कर्म इति।
ग. तत्रैव यमलोकस्य दृश्यं दर्शितवान्।
घ. यमराजः दूतान् पृच्छति।
ङ. राज्ञः धर्मः प्रजापालनम्।

**योग्यताविस्तारः —**

- विक्रमादित्यस्य कथासङ्ग्रहं कुरुत।

*कर्मण्येवाधिकारस्ते।*

## अष्टादशः पाठः

# प्रियदर्शिनी इन्दिरा

P4Y3N9

अस्माभिः प्रियदर्शिन्याः इन्दिरायाः दर्शनमनेकधा कृतम्। कोटिजनैः तस्या ऊर्जस्वलानि भाषणानि श्रुतानि। सहस्रैः बालकैः तस्याः हस्ताभ्यां सस्नेहं प्रदत्ताः पुष्पमालाः गृहीता अतः दिवङ्गतापि सा देवी अस्माकं कृते वर्तमानेवास्ति।

तस्याः जन्म प्रयागनगरे 1917 तमे खिस्ताब्दे आनन्दभवननामके पैतृकगृहे अभवत्। जवाहरलालनेहरुः तस्याः पिता कमलानेहरु च जननी अभवत्।

इन्दिरायाः प्रारम्भिकी शिक्षा प्रयागे पूनानगरे चाभवत्। तेषु दिवसेषु आनन्दभवनं स्वतन्त्रतान्दोलनस्य केन्द्रमासीत्। सर्वे राष्ट्रियाः नेतारः तत्रागच्छन्। इन्दिरा तेभ्यः देशभक्तेः सङ्घर्षशीलतायाश्च संस्कारानगृह्णात्। प्राथमिकीं शिक्षां समाप्य सा शान्तिनिकेतनमगच्छत्। तत्र गुरुदेवस्य रवीन्द्रनाथठाकुरस्य सान्निध्ये भारतीयसंस्कृतेः मानवप्रेम्णः च महतीं शिक्षां प्राप्नोत्। तस्याः उच्चशिक्षा इङ्ग्लैण्डदेशे आक्सफोर्डविश्वविद्यालये सम्पन्ना।

जवाहरलालनेहरुः बहुधा स्वतन्त्रतायै आन्दोलनं कुर्वन् कारागारमगच्छत्। कारागारात् सः इन्दिरायै अनेकपत्राणि प्रेषितवान्। एतानि पत्राणि 'पुत्र्याः कृते पितुः पत्राणि' इति नाम्ना पुस्तकरूपेण प्रसिद्धानि सन्ति। तेभ्यः ज्ञायते यत् नेहरुः स्वपुत्रीं विदुषीं दूरदर्शिनीं ऊर्जस्वलां च द्रष्टुमैच्छत्।

इन्दिरायाः एते गुणाः प्रसिद्धाः सन्ति। स्वमातुः कमलानेहरुतः सत्यस्य शुद्धान्तःकरणस्य च शिक्षामलभत। बाल्यकाले एव तया 'वानरसेना' इति नाम्नी बालकानां सङ्घटना कृता।

तस्याः विवाहः फिरोजगान्धिना सहाभवत्। तौ दम्पती स्वाधीनतान्दोलने कारागारं गतवन्तौ। 1960 तमे खिस्ताब्दे तस्याः पतिः स्वर्गमगच्छत्।

लालबहादुरशास्त्रिणः मृत्योरनन्तरं सा भारतस्य 'प्रधानमन्त्री' अभवत्। तत्पदमङ्गीकृत्य सा देशसेवायां सर्वभावेन संलग्ना जाता। अधिकोषाणां राष्ट्रियकरणं भूतपूर्वराज्ञां विशिष्टाधिकाराणां समाप्तिः तेषां नैजधनदानस्य (प्रिवीपर्स) अन्तः भूमिसम्पत्योः सीमानिर्धारणं चेत्यादीनि कार्याणि तस्याः महत्त्वम् उद्भासयन्ति। बङ्ग्लादेशस्य मुक्तिसङ्ग्रामे भारतीयसेनां प्रेष्य तया अपूर्वसाहसं कृतम्। भारतस्य सहयोगेनैव बङ्ग्लादेशः स्वतन्त्रः जातः। सा जीवनपर्यन्तं भारतस्य कल्याणाय निर्धनानामुत्थानाय च प्रयत्नमकरोत्। दरिद्रतामपनय इति तस्याः उद्घोषणासीत्।

1984 तमस्य खिस्ताब्दस्य अक्टूबरमासे एकत्रिंशद्दिनाङ्के सा एकस्य स्वरक्षकस्यैव गोलिकाभिः वीरगतिं प्राप्नोत्।

सर्वे जनाः तां 'शान्तिदूती' इति रूपेण श्रद्धया स्मरन्ति। तस्याः समाधिस्थलं शक्तिस्थलमिति नाम्ना प्रसिद्धमस्ति।

## शब्दार्थाः

| | | | | | |
|---|---|---|---|---|---|
| अनेकधा | — | कई बार | अधिकोषः | — | बैंक |
| कोटिजनैः | — | करोड़ों लोगों के द्वारा | सान्निध्ये | — | पास में |
| ऊर्जस्वलानि | — | तेजस्वी/तेजपूर्ण | उद्भासयन्ति | — | प्रगट करते हैं |
| सर्वभावेन | — | पूर्णरूप से | अपनय | — | दूर करो/हटाओ |
| अङ्गीकृत्य | — | स्वीकार करके | अवहन् | — | ले जाते थे |
| अतीताः | — | भूतकाल की | उद्घोषणा | — | नारा |

## अभ्यासः

1. **एकपदेन उत्तरं लिखत —**

क. इन्दिरायाः भाषणानि कीदृशानि आसन्?

ख. इन्दिरायाः उच्चशिक्षा कुत्र अभवत्?

ग. नेहरुः स्वपुत्रीं कथं द्रष्टुमैच्छत्?

घ. इन्दिरा कुत्र भारतीयसेनां प्रेषितवती?

ङ इन्दिरायाः का उद्घोषणा आसीत्?

2. **एकवाक्येन उत्तरं लिखत —**

क. दिवङ्गतापि का अस्माकं कृते वर्तमानेवास्ति?

ख. इन्दिरायाः जन्म कदा अभवत्?

ग. इन्दिरायाः जन्म कुत्र अभवत्?

घ. जवाहरलालनेहरुः किं कुर्वन् कारागरमगच्छत्?

ङ. इन्दिरायाः समाधिस्थलं केन नाम्ना प्रसिद्धमस्ति?

3. **रिक्तस्थानानि पूरयत —**

क. .................. इन्दिरायाः पिता आसीत्।

ख. सर्वे ..................... तत्रागच्छन्।

ग. तया .................. नाम्नी बालकानां सङ्घटना कृता।

घ. ...................... सहयोगेन बङ्गलादेशः स्वतन्त्रः जातः।

ङ. सर्वे जनाः तां .................. इति रूपेण स्मरन्ति।

4. **नामोल्लेखपूर्वकं समासविग्रहं कुरुत —**

क. पुष्पमाला:
ख. देशभक्तः
ग. सीमानिर्धारणम्
घ. वीरगतिम्

5. **नामोल्लेखपूर्वकं सन्धिविच्छेदं कुरुत —**

क. दर्शनमनेकधा
ख. स्वतन्त्रतान्दोलनस्य
ग. तत्रागच्छन्
घ. दरिद्रतामपनय
ङ द्रष्टुमैच्छत्

6. **अधोलिखितशब्दान् आधृत्य वाक्यरचनां कुरुत —**

क. कृते
ख. समाप्य
ग. कुर्वन्
घ. सह
ङ. अङ्गीकृत्य

7. **उचितं योजयत —**

| | अ. | ब. |
|---|---|---|
| क. | इन्दिरायाः जन्म | वानरसेना |
| ख. | इन्दिरायाः पतिः | जवाहरलालनेहरुः |
| ग. | इन्दिरायाः माता | फिरोजगान्धिः |
| घ. | इन्दिरायाः पिता | कमलानेहरुः |
| ङ. | बालकानां सङ्घटना | प्रयागनगरे |

8. **"इन्दिरागान्धिः" इति विषयमवलम्ब्य संस्कृते दशवाक्यानि लिखत।**

9. **भिन्नप्रकृतिकं शब्दं चिनुत —**

क. इन्दिरा, पार्वती, अहिल्या, लक्ष्मीबाई।
ख. अक्टूबरमासः, अगस्तमासः, चैत्रमासः, जूनमासः।
ग. जलसेना, वानरसेना, थलसेना, वायुसेना।
घ. प्रधानमन्त्री, वित्तमन्त्री, रक्षामन्त्री, महामन्त्री।

**योग्यताविस्तारः —**

- इन्दिरायाः जीवनवृत्तं पठत।
- स्वतन्त्रभारतस्य प्रधानमन्त्रिणां नामानि क्रमानुसारं लिखत।

*गुणाः पूजास्थानं गुणिषु न च लिंग न च वयः।*

## नवदशः पाठः

# हट्टभ्रमणम्

(पत्रवाहकः द्वारविद्युद् घण्टिकां वादयति। विभुः द्वारम् उद्घाटयति। पत्रवाहकात् पत्रं गृहीत्वा पितरं प्रसन्नतया सूचयति– पितः! पितः! मम मित्रं गिरिराजस्य पत्रमिदम् आगतम्। एतत् श्रुत्वा पिता तं कथयति तर्हि श्रावयतु। सः उच्चस्वरेण पत्रं पठति।)

साठखेड़ाग्रामतः

दिनाङ्कः - 20-6-2006

प्रिय मित्र! विभो!

सप्रेम नमस्कारः

अहं ग्रीष्मावकाशे स्वग्रामं ह्यः आगतवान्। स्वगृहे स्थित्वा ग्राम्यजीवनस्य आनन्दम् अनुभवामि। प्रार्थयामि यत् भवान् अपि नगरीयकोलाहलात् किञ्चित् कालम् अत्रागत्य पश्यतु ग्राम्यजीवनम्।

मम ग्रामस्य समीपे एव मेलखेड़ा नाम्नि ग्रामे प्रतिमङ्गलवासरे हट्टः भवति। ग्रामं परितः लघु-लघु ग्रामाः सन्ति। तत्रत्याः ग्रामीणाः मित्रैः परिवारैश्च सह हट्टदिने अत्रागच्छन्ति। हट्टस्थानं विस्तृतं रमणीयं चास्ति। अस्मिन् हट्टे जम्बूः, कदम्बः, वटः, पिप्पलस्य च वृक्षाः सन्ति। विक्रेतारः वृक्षच्छायायाम् आपणान् आयोज्य गोधूमान्, चणकान्, यवान्,तण्डुलान्, द्विदलानि इत्यादीनि धान्यानि विक्रीणन्ति। एतद् अतिरिक्तम् अन्येषां वस्तूनाम् अपि विक्रयणम् अत्र भवति। अत्र मोदकम्, कुण्डलीम्, अमृतीम्, रसगोलकम् इत्यादीनि मिष्ठान्नानि च मिलन्ति। मिष्ठान्नानि मह्यं रोचन्ते। शाकानाम्, फलानां चापि अत्र हट्टे विक्रयः भवति। तेषु आलुकम् पलाण्डुः, कूष्माण्डं, शिम्बाम्, मूलिका, कर्कटिकादीनि शाकानि तथा च



कदलीफलम्, आम्रम्, खर्जूरादीनि बहूनि फलानि प्राप्नुवन्ति। अत्र लौहकारस्य, कुम्भकारस्य, स्वर्णकारस्य चापि आपणाः भवन्ति। एवं बहवः आपणाः अत्र सन्ति।

अस्य हट्टस्य महत्त्वपूर्णपक्षोऽयं यत् अत्र दूर-दूराद् आगत्य ग्रामीणजना: परस्परं मिलन्ति। ते अत्र संवादं वार्तालापं च कुर्वन्ति। एवं ते परस्परं मिलित्वा सर्वे मुदिता: भवन्ति।

मित्र! त्वम् अत्र अवश्यमेव आगच्छ। अस्तु, पत्रं समापयामि। स्वकीयपितृपादयो: मम प्रणतिं समर्पय। मम गृहे सर्वे कुशलिन: सन्ति।

प्रतीक्षायाम्।

भवदीय:

गिरिराजनायक:

## शब्दार्था:

| | | | | | |
|---|---|---|---|---|---|
| आगत्य | — | आकर | रसगोलकम् | — | रसगुल्ला |
| हट्ट: | — | हाट | अमृती | — | इमरती |
| तत्रत्या: | — | वहाँ के | गोधूमा: | — | गेहूँ |
| परित: | — | चारों ओर | शिम्ब: | — | सेम |
| आपण: | — | दुकान | कूष्माण्ड: | — | कद्दू |
| द्विदलम् | — | दाल | कर्कटिका | — | ककड़ी |
| कुण्डली | — | जलेबी | | | |

## अभ्यास:

1. **एकपदेन उत्तरं लिखत—**

क. ग्रीष्मावकाशे स्वग्रामं क: आगतवान्?

ख. कस्मिन् ग्रामे हट्ट: भवति?

ग. हट्ट: कस्मिन् दिवसे भवति?

घ. विक्रेतार: कुत्र आपणान् आयोजयन्ति?

ङ. हट्टदिने के आगच्छन्ति?

2. **एकवाक्येन उत्तरं लिखत—**

क. ग्रामं परित: के सन्ति?

ख. पञ्चशाकानां नामानि लिखत?

ग. पञ्चानाम् अन्नानां नामानि लिखत?

घ. ग्रामीणा: परस्परं मिलित्वा किं कुर्वन्ति?

ङ. हट्टस्थाने के के वृक्षा: सन्ति?

**3. रिक्तस्थानानि पूरयत—**

क. अहं ग्रीष्मावकाशे ................. आगतवान्।

ख. अत्रागत्य पश्यतु .....................।

ग. ....................... हट्टः भवति।

घ. हट्टस्थानं विस्तृतं रमणीयं ...............।

ङ. परस्परं मिलित्वा .................... मुदिताः भवन्ति।

**4. अर्थानुसारं योजयत—**

| | (अ) | | (ब) |
|---|---|---|---|
| क. | प्रिय! | – | भवन्ति |
| ख. | आपणाः | – | मित्र! |
| ग. | अत्रागच्छन्ति | – | प्रतिमङ्गलवासरे |
| घ. | हट्टः | – | समर्पय |
| ङ. | प्रणतिं | – | हट्टदिने |

**5. निम्नलिखितपदानां मूलशब्दं विभक्तिं वचनं च लिखत—**

| | पदानि | मूलशब्दः | विभक्तिः | वचनम् |
|---|---|---|---|---|
| क. | आपणाः | | | |
| ख. | मित्रैः | | | |
| ग. | जीवनस्य | | | |
| घ. | ग्रामे | | | |
| ङ. | मोदकम् | | | |

**6. निम्नाङ्किताव्ययानां वाक्ये प्रयोगं कुरुत—**

**यथा—** तत्र जनाः आगच्छन्ति।

(क) ह्यः (ख) अत्र (ग) च

(घ) अपि (ङ) प्रति

**योग्यताविस्तारः —**

- ग्रामीणजनानां जीवनचर्यां ज्ञात्वा पञ्च वाक्यानि लिखत।
- एकस्य मेलापकस्य वर्णनं कुरुत।
- अवकाशार्थम् अथवा शुल्कमुक्तिहेतोः प्रार्थनापत्रं लिखत।

*न रत्नमन्विष्यति मृग्यते हि तत्।*

# विंशः पाठः

# नर्मदा

पावनसलिलानर्मदा अस्माकं प्रदेशस्य जीवनदायिनी सरिता अस्ति। एषा एव रेवा-मेकलसुतादिभिः अनेकनामभिः प्रसिद्धा। अस्याः उभयोः तटयोः अनेकानि तीर्थस्थानानि, तपस्विनाम् आश्रमाश्च सन्ति। प्राचीनकालादेव अस्याः पावनतटयोः तपस्विनां सिद्धस्थलानि सन्ति। अतः जनाः नर्मदायाः परिक्रमणं कृत्वा आत्मानं धन्यं पवित्रं च मन्यन्ते। अत्रत्यं नैसर्गिकं सौन्दर्यमपि दर्शनीयम्।


अमरकण्टकम्

अनूपपुरमण्डले अमरकण्टकं नाम पर्वतोऽस्ति। तत एव नर्मदा प्रादुर्भवति। तदनन्तरम् एषा गहनारण्येषु उत्तुङ्गपर्वतेषु च भ्रमणं कुर्वती डिण्डोरीमण्डलं प्रविशति। डिण्डोरीतः सर्पाकारगत्या उच्चावचमार्गेण महाराजपुरं प्राप्नोति। ततः जाबालिपुरम् आगच्छति। श्वेतशिलाखण्डानां कृतेऽतिप्रसिद्धे भेड़ाघाटनामके स्थाने धूमधारजलप्रपातस्वरूपं धारयति। तद् अवलोकनार्थं बहवः पर्यटकाः अत्र आगच्छन्ति।


धूमधारजलप्रपातः


भेड़ाघट्टः

जाबालिपुरतः ब्रह्माण्डघट्टम् आयाति ततः अनेकक्षेत्राणि पावयन्ती इयं नर्मदापुरम् प्रविशति। अत्रत्यं 'सेठानीघाट' इति स्थानं प्रसिद्धम्। अस्मिन् नगरे अस्याः तटे अनेके देवालयाः आश्रमाश्च सन्ति। अत्र भक्तैः कृताः प्रार्थनाः घण्टानादाश्च अहर्निशं श्रूयन्ते।

ततो वेगवती एषा तरङ्गिणी ओङ्कारेश्वरनगरं स्पृशति। अत्र अमलेश्वरनामज्योतिर्लिङ्गं समाराधयन्ती ओंकार इव आकृतिं धारयति। अत्रैव आद्यशङ्कराचार्यस्य गुरोः गोविन्दपादाचार्यस्य पवित्रस्थानम् अप्यस्ति।



ओङ्कारेश्वरम्

ततः मण्डनमिश्रेण मण्डितं मण्डलेश्वर-नगरमपि एषा मण्डयति। मण्डलेश्वरनगरात् महाराज्ञ्या अहिल्यया सेविते माहिष्मतीनगरे अस्याः अतिविस्तृतं रूपं दृश्यते। पश्चात् खलघाटेशूलपाणेश्वरादीनि स्थानानि सिञ्चन्ती सा गुर्जरप्रान्तस्य भृगुकच्छनगरसमीपे अरबसागरे विलीयते।

नर्मदानद्यामेव बरगी-इन्दिरासागर-सरदारसरोवरादयः बहवः बन्धाः निर्मिताः सन्ति। यावन्तः बन्धाः नर्मदानद्यां सन्ति तावन्तः अन्यासु नदीषु न सन्ति। एभिः बन्धैः विद्युदुत्पादनम्, भूमिसेचनम्, जलपरिवहनम्, अभयारण्यनिर्माणम्, पर्यटनस्थलनिर्माणम् इत्यादयो विविधलाभाः भवन्ति। एतेषाम् उपकाराणां हेतुः एषा एव।

एषा नामस्मरणमात्रेण पापम् अपाकरोति। पुराणेषु अस्याः बहुविधमाहात्म्यं प्रतिपादितम्। कालिदासेनापि मेघदूते अस्याः सौन्दर्यं माहात्म्यं च वर्णितम्। धन्या एषा भूमिः यत्र रेवा राजते।

### शब्दार्थाः

| | | |
|---|---|---|
| सिद्धस्थलानि | — | सिद्धभूमि/तीर्थ |
| अत्रत्यम् | — | यहाँ का |
| उत्तुङ्गम् | — | ऊँचा |
| उच्चावचमार्गेण | - | ऊँचे-नीचे मार्ग से |
| सर्पाकारगत्या | — | वक्रगति से |
| महाराजपुरम् | — | मण्डला का प्राचीन नाम |
| प्राप्नोति | — | पहुँचती है |
| श्वेतशिलाखण्डानाम् | — | सङ्गमरमर-चट्टानों के |
| धूमधारः | — | धुँआधार |
| ओङ्कार इव | — | ओङ्कार के समान |
| ब्रह्माण्डघट्टः | — | बरमान घाट का प्राचीन नाम |
| माहिष्मतीनगरम् | — | महेश्वर नगर का प्राचीन नाम |
| भृगुकच्छनगरम् | — | भरूच नगर का प्राचीन नाम |

## अभ्यासः

### 1. एकपदेन उत्तरं लिखत—

क. अस्माकं प्रदेशस्य जीवनदायिनी का?

ख. नर्मदा कस्मात् स्थानात् प्रादुर्भवति?

ग. कस्याः नाम रेवा?

घ. अमरकण्टकस्थानं कस्मिन् मण्डले अस्ति?

ङ. नर्मदा कस्मिन् सागरे मिलति?

च. मण्डनमिश्रः कस्मिन् नगरे वसति स्म?

### 2. एकवाक्येन उत्तरं लिखत—

क. धूमधारजलप्रपातः कुत्र अस्ति?

ख. सेठानीघाटस्थानं कस्मिन् नगरे अस्ति?

ग. ओङ्कारेश्वरनगरे किं नाम ज्योतिर्लिङ्गम्?

घ. सरदारसरोवरबन्धः कस्यां नद्याम् अस्ति?

ङ. बन्धैः के लाभाः?

### 3. उचितशब्देन रिक्तस्थानं पूरयत—

क. नर्मदायाः अपरं नाम .......................... अस्ति। (भागीरथी/मेकलसुता)

ख. नर्मदानदी ...................... जीवनदायिनी कथ्यते। (उत्तरप्रदेशस्य/मध्यप्रदेशस्य)

ग. अमलेश्वरज्योतिर्लिङ्गम् ......................... अस्ति। (उज्जयिन्याम्/ओङ्कारेश्वरनगरे)

घ. आद्यशङ्कराचार्यस्य गुरोः नाम ............ अस्ति। (महर्षिः वाल्मीकिः/गोविन्दपादाचार्यः)

ङ. बरगीबन्धः ......................... अस्ति। (नर्मदायाम्/गोदावर्याम्)

### 4. उचितं योजयत—

| | (अ) | | (ब) |
|---|---|---|---|
| क. | महाराजपुरम् | – | जबलपुरनगरम् |
| ख. | नर्मदायाः विलयः | – | ओङ्कारेश्वरनगरे |
| ग. | गोविन्दपादाचार्यस्य आश्रमः | – | मण्डलानगरम् |
| घ. | जाबालिपुरम् | – | भेड़ाघाटस्थाने |
| ङ. | धूमधारजलप्रपातः | – | अरबसागरे |

5. **शुद्धवाक्यानां समक्षम् "आम्" अशुद्धवाक्यानां समक्षं "न" इति लिखत—**

क. नर्मदा अमरकण्टकात् प्रादुर्भवति।

ख. रेवा नर्मदायाः अपरं नाम अस्ति।

ग. नर्मदायां सरदारसरोवरबन्धः अस्ति।

घ. मेघदूते नर्मदायाः वर्णनं नास्ति।

ङ. पुराणेषु नर्मदायाः वर्णनम् अस्ति।

6. **नामोल्लेखपूर्वकं सन्धिविच्छेदं कुरुत—**

क. गहनारण्येषु

ख. अत्रैव

ग. अवलोकनार्थम्

घ. इत्यादयः

7. **नामोल्लेखपूर्वकं समासविग्रहं कुरुत—**

क. अभयारण्यनिर्माणम्

ख. देवालयाः

ग. घण्टानादाः

घ. भूमिसेचनम्

**योग्यताविस्तारः —**

- मानचित्रमवलम्ब्य नर्मदायाः आद्यन्तमार्गं निरूपयत।
- भ्रमणकार्यक्रमे नर्मदातटस्थितानि प्रमुखतीर्थानि अवलोकयत।
- श्लोकं स्मरत—

सबिन्दुसिन्धु-सुस्खलत्तरङ्गभङ्गरञ्जितं,
द्विषत्सुपापजात-जातकारि-वारिसंयुतम्।
कृतान्त-दूतकालभूत-भीतिहारि वर्मदे,
त्वदीयपादपङ्कजं नमामि देवि नर्मदे॥

*पुण्या सर्वत्र नर्मदा।*

# एकविंशः पाठः

# सूक्तयः

(साधकानाम् अनुभवात् निस्सृता वाणी, उक्तिः सूक्तिः वा जायते। अत्र युक्तेः अपेक्षया जीवनानुभवस्य महत्त्वं वर्तते। सूक्तेः श्रवणानन्तरम् एव वक्तुः श्रोतुः च सूक्तितत्त्वं समानरूपेण अनूभूयते। सूक्तिः जीवनसारं संक्षेपेण उपस्थापयति)

1. विद्वान् सर्वत्र पूज्यते।
2. महतामेकरूपता।
3. शीलं सर्वत्र वै धनम्।
4. नास्ति ज्ञानात् परं सुखम्।
5. आज्ञा गुरूणां ह्यविचारणीया।
6. हितं मनोहारि च दुर्लभं वचः।
7. क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे।
8. गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः।
9. न रत्नमन्विष्यति मृग्यते हि तत्।
10. विक्रमार्जितसत्त्वस्य स्वयमेव मृगेन्द्रता।

## शब्दार्थाः

एकरूपता — सब को एक भाव से मानना

वाणी — वचन

ह्यविचारणीया— विचार करने योग्य नहीं

क्रियासिद्धिः — कार्य की सिद्धि

पूजास्थानम् — पूजा योग्य/आदर योग्य/पूजा का स्थान

विक्रमार्जितसत्त्वस्य — पराक्रम द्वारा प्राप्त किए हुए स्वामित्त्व का।

मृगेन्द्रता — सिंह का आधिपत्य/पशुओं का स्वामित्त्व

अन्विष्यति — ढूँढ़ेगा

मृग्यते — ढूँढ़ता है

वयः — अवस्था/आयु

लिङ्गम् - पुरुष/स्त्री (पुंल्लिङ्ग/स्त्रीलिङ्ग)

## अभ्यासः

1. **एकपदेन उत्तरं लिखत—**

क. कः सर्वत्र पूज्यते?

ख. कस्य स्वयमेव मृगेन्द्रता वर्तते?

ग. कस्मात् परं सुखं नास्ति?

घ. सर्वत्रं धनं किम् अस्ति?

ङ. केषां क्रियासिद्धिः सत्त्वे भवति?

2. **एकवाक्येन उत्तरं लिखत—**

क. पूजास्थानं के न भवतः?

ख. दुर्लभं वचः किम्?

ग. केषाम् आज्ञा अविचारणीया?

घ. किं न अन्विष्यति किञ्च मृग्यते?

ङ. महतां क्रियासिद्धिः कुत्र भवति? कुत्र न भवति?

3. **रिक्तस्थानानि पूरयत—**

क. ..................... एकरूपता।

ख. .................... सर्वत्र पूज्यते।

ग. नास्ति .................... परं सुखम्।

घ. गुणाः पूजास्थानं गुणिषु न च ................. न च ................।

ङ. ..................... सर्वत्र वै धनम्।

4. **विलोमपदानि पाठात् चित्वा लिखत—**

क. एकत्र    ख. दोषाः    ग. अस्ति

घ. अनेकरूपता    ङ. दुःखम्

5. **उचितमेलनं कुरुत—**

| | (अ) | | (ब) |
|---|---|---|---|
| क. | शीलम् | – | महताम् |
| ख. | गुणाः | – | मृग्यते |
| ग. | क्रियासिद्धिः | – | सर्वत्र वै धनम् |
| घ. | रत्नम् | – | महतां सत्त्वे भवति |
| ङ. | एकरूपता | – | पूजास्थानम् |

6. शुद्धवाक्यानां समक्षम् ''आम्'' अशुद्धवाक्यानां समक्षं ''न'' इति लिखत—

क. हितं मनोहारि च दुर्लभं वचः।

ख. विद्वान् सर्वत्र न पूज्यते।

ग. गुणाः पूजास्थानम्।

घ. रत्नम् अन्विष्यति न मृग्यते।

ङ. विक्रमार्जितसत्त्वस्य स्वयमेव मृगेन्द्रता।

7. संस्कृतवाक्येषु प्रयोगं कुरुत—

क. सर्वत्र

ख. दुर्लभम्

ग. मृग्यते

घ. ज्ञानात्

ङ. एव

8. रेखाङ्कितं पदम् आधृत्य प्रश्ननिर्माणं कुरुत—

क. विद्वान् सर्वत्र पूज्यते।

ख. गुणाः पूजास्थानम्।

ग. आज्ञा गुरूणां ह्यविचारणीया।

घ. नास्ति ज्ञानात् परं सुखम्।

ङ. क्रियासिद्धिः सत्त्वे भवति।

**योग्यताविस्तारः —**

- अन्यान्यसूक्तीः काले काले सङ्कलय्य वारं वारं पठन्तु।

## सूक्तीनां पारायणम्

1. स्वगृहे पूज्यते मूर्खः स्वग्रामे पूज्यते प्रभुः।
स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते॥

2. विद्वत्वं च नृपत्वं च नैव तुल्यं कदाचन।
स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते॥

3. यथा चित्तं तथा वाचः यथा वाचः तथा क्रियाः।
चित्ते वाचि क्रियायां च महतामेकरूपता॥

4. उदये सविता ताम्रस्ताम्र एवास्तमेति च।
सम्पत्तौ च विपत्तौ च महतामेकरूपता ॥

5. विदेशेषु धनं विद्या व्यसनेषु धनं मतिः।
परलोके धनं धर्मः शीलं सर्वत्र वै धनम्॥

6. रथस्यैकं चक्रं भुजगयमिता सप्ततुरगाः,
निरालम्बो मार्गः चरणरहितः सारथिरपि।
व्रजत्यन्तं सूर्यः प्रतिदिनमपारस्य नभसः,
क्रियासिद्धिः सत्वे भवति महतां नोपकरणे॥

7. विजेतव्या लङ्का चरणतरणीयो जलनिधिः,
विपक्षो लङ्केशो रणभुवि सहायाश्च कपयः।
तथाप्येको रामः सकलमवधीद् राक्षसकुलम्,
क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे॥

8. आज्ञा गुरुणां ह्यविचारणीया (रघुवंशे)

9. हितं मनोहारि च दुर्लभं वचः (किरातर्जुनीये)

*प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।*

# विविधप्रश्नावलिः – 3

S6G9A2

**1. प्रश्नानाम् एकपदेन उत्तरं लिखत—**

क. काव्येषु किं रम्यम्?

ख. दुष्यन्तशकुन्तलयोः पुत्रस्य किं नाम?

ग. कर्मणां लेखनं कस्य पार्श्वे अस्ति?

घ. विक्रमादित्यः नगरभ्रमणसमये किं दृष्टवान्?

ङ. नर्मदा कस्मात् स्थानात् प्रादुर्भवति?

च. कस्याः नाम रेवा?

छ. कः सर्वत्र पूज्यते?

ज. कस्मात् परं सुखं नास्ति?

झ. कम्बलवन्तं किं न बाधते?

ञ. करिणां कुलं को हन्ति?

ट. हट्टः कस्मिन् दिवसे भवति?

ठ. विक्रेतारः कुत्र आपणान् आयोजयन्ति?

ड. इन्दिरायाः भाषणानि कीदृशानि आसन्?

ढ. इन्दिरा कुत्र भारतीयसेनां प्रेषितवती?

**2. प्रश्नानाम् एकवाक्येन उत्तरं लिखत—**

क. अस्माकं देशस्य नाम 'भारतवर्षम्' इति कथं प्रसिद्धम्?

ख. कालिदासेन विरचितानां नाट्यग्रन्थानां नामानि लिखत।

ग. कर्मतपस्ययोः कः भेदः?

घ. विक्रमादित्यः लोके कथं प्रसिद्धः?

छ. धूमधारजलप्रपातः कुत्र अस्ति?

ज. बन्धैः के लाभाः?

झ. दुर्लभं वचः किम्?

ञ. किं न अन्विष्यति किञ्च मृग्यते?

ट. शङ्करं पतितं दृष्ट्वा पार्वती कीदृशी भवति?

ठ. काशीतलवाहिनी का?

ड. पञ्च शाकानां नामानि लिखत?

ढ. पञ्चानाम् अन्नानां नामानि लिखत?

ण. दिवङ्गतापि का अस्माकं कृते वर्तमानेवास्ति?

त. इन्दिरायाः समाधिस्थलं केन नाम्ना प्रसिद्धमस्ति?

## 3. रेखाङ्कितपदम् आधृत्य प्रश्ननिर्माणं कुरुत—

क. कालिदासस्य उपमा विश्वप्रसिद्धा।

ख. तेन मेघदूतं विरचितम्।

ग. मेघः दूतरूपेण अलकापुरीं गच्छति।

घ. तत्रैव यमलोकस्य दृश्यं दर्शितवान्।

ङ. यमराजः दूतान् पृच्छति।

च. राज्ञः धर्मः प्रजापालनम्।

छ. पुराणेषु नर्मदायाः वर्णनम् अस्ति।

ज. विद्वान् सर्वत्र पूज्यते।

झ. नास्ति ज्ञानात् परं सुखम्।

## 4. कोष्ठकात् उचितानि पदानि चित्वा रिक्तस्थानानि पूरयत—

क. प्रवर्तताम् .................... पार्थिवः। (स्वहिताय/प्रकृतिहिताय)

ख. सर्वः ................. नन्दतु। (अन्यत्र/सर्वत्र)

ग. सर्वो ................ पश्यतु। (भद्राणि/अभद्राणि)

घ. विक्रमादित्यस्य समीपे एकः .......... तपस्यारतः आसीत्। (महात्मा/दुरात्मा)

ङ. वने सः कठिनां ............. आरब्धवान्। (तपस्याम्/दिनचर्याम्)

च. नर्मदायाः अपरं नाम .................. अस्ति। (भागीरथी/मेकलसुता)

छ. नर्मदानदी .................... जीवनदायिनी इति कथ्यते। (उत्तरप्रदेशस्य/मध्यप्रदेशस्य)

ज. .................... सर्वत्र वै धनम्। (शीलं/स्वर्णम्)

## 5 उचितं योजयत —

| | (अ) | | (ब) |
|---|---|---|---|
| क. | सर्वः सर्वत्र | – | अभिज्ञानशाकुन्तलम् |
| ख. | सर्वश्रेष्ठनाट्यम् | – | नन्दतु |
| ग. | विक्रमादित्यस्य ध्येयवाक्यम् | – | अरबसागरे |
| घ. | नर्मदायाः मेलनम् | – | सत्कर्म एव धर्मः |
| ङ. | जाबालिपुरम् | – | पूजास्थानम् |
| च. | गुणाः | – | जबलपुरनगरम् |

## 6. शुद्धवाक्यानां समक्षम् 'आम्' अशुद्धवाक्यानां समक्षं 'न' इति लिखत—

क. मेघदूते नर्मदायाः वर्णनं नास्ति। [ ]

ख. रेवा नर्मदायाः अपरं नाम अस्ति। [ ]

ग. कालिदासस्य उपमा विश्वप्रसिद्धा अस्ति। [ ]

घ. गणनाप्रसङ्गे कालिदासः अनामिकाधिष्ठितः अस्ति। [ ]

ङ. विद्वान् सर्वत्र न पूज्यते। [ ]

च. आज्ञा गुरूणाम् ह्यविचारणीया। [ ]

## 7. अपेक्षितं पदपरिचयं लिखत—

| | पदम् | मूलशब्दः | लिङ्गम् | विभक्तिः | वचनम् | अर्थः |
|---|---|---|---|---|---|---|
| क. | नर्मदा | | | | | |
| ख. | कालिदासः | | | | | |
| ग. | मेघदूतस्य | | | | | |
| घ. | नाटकेषु | | | | | |
| ङ. | कवीनाम् | | | | | |
| च. | राज्ञः | | | | | |
| छ. | उत्तमानि | | | | | |
| ज. | एषा | | | | | |
| झ. | ज्ञानात् | | | | | |
| ञ. | मुखे | | | | | |

## 8. भिन्नप्रकृतिकं शब्दं चिनुत—

क. अत्र, तत्र, सर्वत्र, मित्रम्।

ख. श्रोतुम्, गन्तुम्, धेनुम्, ज्ञातुम्।

ग. रामायणम्, पुराणम्, कालिदासः, महाभारतम्।

घ. अभिज्ञानशाकुन्तलम्, मालविकाग्निमित्रम्, विक्रमोर्वशीयम्, मेघदूतम्।

ङ. छात्रः, सीता, गीता, शिक्षिका।

## 9. अधोलिखितगद्यांशं पठित्वा उत्तराणि लिखत—

अनूपपुरमण्डले अमरकण्टकं नाम पर्वतोऽस्ति। तत एव नर्मदा प्रादुर्भवति। तदनन्तरम् एषा गहनारण्येषु उत्तुङ्गपर्वतेषु च भ्रमणं कुर्वती डिण्डोरीमण्डलं प्रविशति।

क. अनूपपुरमण्डले किं नाम पर्वतः अस्ति?

ख. कुतः नर्मदा प्रादुर्भवति?

ग. डिण्डोरीमण्डलं का प्रविशति?

अथवा

तेन मेघदूतम् ऋतुसंहारञ्च द्वे खण्डकाव्ये विरचिते। मेघदूते पूर्वमेघः उत्तरमेघश्चेति द्वौ भागौ स्तः। अस्मिन् काव्ये मेघः यक्षस्य दूतः अभवत्। सः मेघः दूतरूपेण रामगिरितः हिमालयस्थानम् अलकापुरीं गच्छति। दूतमार्गस्य वर्णनं नैसर्गिकम् अतीव रमणीयं चास्ति।

क. कालिदासेन विरचितखण्डकाव्ययोः नाम लिखत।

ख. मेघदूतस्य भागयोः नाम लिखत।

ग. मेघः कस्य दूतः अभवत्?

घ. मेघः दूतरूपेण कुतः गच्छति?

**10. अधोलिखितं पद्यं पठित्वा उत्तराणि लिखत—**

कं सञ्जघान कृष्णः का शीतलवाहिनी गङ्गा।
के दारपोषणरताः कं बलवन्तं न बाधते शीतम्॥

क. कृष्णः कं जघान?

ख. शीतलवाहिनी का?

ग. दारपोषणरताः के?

घ. शीतं कं न बाधते?

अथवा

कस्तूरी जायते कस्मात् को हन्ति करिणां कुलम्।
किं कुर्यात् कातरो युद्धे मृगात् सिंहः पलायनम्॥

क. कस्तूरी कस्मात् जायते?

ख. करिणां कुलं कः हन्ति?

ग. कातरः युद्धे किं कुर्यात्?

घ. मृगात् शब्दे का विभक्तिः?

**11. उचितविकल्पं चित्वा लिखत—**

क. सर्वः पश्यतु। (दूरदर्शनम्/भद्राणि/अभद्राणि)

ख. आज्ञा ह्यविचारणीया (सहचराणाम्/गुरूणाम्/अधमानाम्)

ग. वयं संस्कृतं। (पठति/पठन्ति/पठामः)

घ. कालिदासमहोत्सवस्य आयोजनं भवति।
(कार्तिकपूर्णिमायाम्/देवप्रबोधिन्याम्/कार्तिककृष्णपक्षस्य एकादश्याम्)

# परिशिष्टम्

Y3Z1H2

## संस्कृतस्य सेवनम्

संस्कृतस्य सेवनं, संस्कृताय जीवनम्।
लोकहितसमृद्धये भवतु तनुसमर्पणम्॥

कार्यगौरवं स्मरन्
विघ्नवारिधिं तरन्
लक्ष्यसिद्धिमक्षिसात् करोमि सोद्यमः स्वयम्।
यावदेति संस्कृतं, प्रतिजनं गृहं गृहम्
तावदविरता गतिस्तावदनुपदं पदम्॥ 1॥

कामये न सम्पदं
भोगसाधनं सुखम्
किञ्चिदन्यदाद्रिये विना न संस्कृतोन्नतिम्।
गौरवास्पदं पदं, नेतुमद्य संस्कृतम्
बद्धकटिरयं जनो निधाय जीवनं पणम्॥ 2॥

भाषिता च वागियं
भाषिता भवेद्ध्रुवम्
भाष्यमाणतां समेत्य राजतां पुनश्चिरम्।
भरतभूमिभूषणं सर्ववाग्विभूषणम्
संस्कृतिप्रवाहकं संस्कृतं विराजताम्॥3॥

# चिरनवीना संस्कृता एषा

चिरनवीना संस्कृता एषा, गीर्वाणभाषा
चिरनवीना संस्कृता एषा।।
महतो भूतस्य निःश्वसितम्
अस्ति यस्याम्, अतिपुरातन–वेदसाहित्यम्
शास्त्रापूरैः स्मृतिविचारैः
वरकवीनां काव्यसारैः
चित्रिता मञ्जुला मञ्जूषा, मञ्जुला भाषा ।। चिरनवीना।।

वाल्मीकि–व्यास–मुनिरचितं,
रामायणं महाकाव्यं महाभारतं
क्लैब्यकिल्बिष–कलित–पार्थं
कार्यविषये योजयन्ती
अस्ति यस्यां भगवती गीता, भगवता कथिता ।। चिरनवीना।।

मातृभाषा मातृभाषाणाम्, भवितुमर्हा
राष्ट्रभाषा भारतीयानाम्,
भवतु भाषाद्वेषनाशः
सर्वथा उद्धेषयामः
भारतीया भारती एषा, अनुपमा सरसा ।। चिरनवीना।।

# शब्दरूपाणि

**ऋकारान्तः पुंल्लिङ्गः पितृ ( पिता ) शब्दः**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | पिता | पितरौ | पितरः |
| द्वितीया | पितरम् | पितरौ | पितॄन् |
| तृतीया | पित्रा | पितृभ्याम् | पितृभिः |
| चतुर्थी | पित्रे | पितृभ्याम् | पितृभ्यः |
| पञ्चमी | पितुः | पितृभ्याम् | पितृभ्यः |
| षष्ठी | पितुः | पित्रोः | पितॄणाम् |
| सप्तमी | पितरि | पित्रोः | पितृषु |
| सम्बोधनम् | हे पितः! | हे पितरौ! | हे पितरः! |

एवमेव भ्रातृ, जामातृ, इत्यादयः।

**ऋकारान्तः पुंल्लिङ्गः 'कर्तृ' ( करने वाला ) शब्दः**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | कर्ता | कर्तारौ | कर्तारः |
| द्वितीया | कर्तारम् | कर्तारौ | कर्तॄन् |
| तृतीया | कर्त्रा | कर्तृभ्याम् | कर्तृभिः |
| चतुर्थी | कर्त्रे | कर्तृभ्याम् | कर्तृभ्यः |
| पञ्चमी | कर्तुः | कर्तृभ्याम् | कर्तृभ्यः |
| षष्ठी | कर्तुः | कर्त्रोः | कर्तॄणाम् |
| सप्तमी | कर्तरि | कर्त्रोः | कर्तृषु |
| सम्बोधनम् | हे कर्तः! | हे कर्तारौ! | हे कर्तारः! |

एवमेव धातृ, दातृ, इत्यादयः।

**ऋकारान्तः स्त्रीलिङ्गः 'मातृ' ( माता ) शब्दः**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | माता | मातरौ | मातरः |
| द्वितीया | मातरम् | मातरौ | मातॄः |
| तृतीया | मात्रा | मातृभ्याम् | मातृभिः |
| चतुर्थी | मात्रे | मातृभ्याम् | मातृभ्यः |
| पञ्चमी | मातुः | मातृभ्याम् | मातृभ्यः |
| षष्ठी | मातुः | मात्रोः | मातॄणाम् |
| सप्तमी | मातरि | मात्रोः | मातृषु |
| सम्बोधनम् | हे मातः! | हे मातरौ! | हे मातरः! |

**उकारान्तः नपुंसकलिङ्गः 'मधु' ( शहद ) शब्दः**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | मधु | मधुनी | मधूनि |
| द्वितीया | मधु | मधुनी | मधूनि |
| तृतीया | मधुना | मधुभ्याम् | मधुभिः |
| चतुर्थी | मधुने | मधुभ्याम् | मधुभ्यः |
| पञ्चमी | मधुनः | मधुभ्याम् | मधुभ्यः |
| षष्ठी | मधुनः | मधुनोः | मधूनाम् |
| सप्तमी | मधुनि | मधुनोः | मधुषु |
| सम्बोधनम् | हे मधु, मधो! | हे मधुनी! | हे मधूनि! |

एवमेव वपु, वस्तु इत्यादयः।

**इकारान्तः ''वारि'' ( जल ) शब्दः ( नपुंसकलिङ्गः )**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | वारि | वारिणी | वारीणि |
| द्वितीया | वारि | वारिणी | वारीणि |
| तृतीया | वारिणा | वारिभ्याम् | वारिभिः |
| चतुर्थी | वारिणे | वारिभ्याम् | वारिभ्यः |
| पञ्चमी | वारिणः | वारिभ्याम् | वारिभ्यः |
| षष्ठी | वारिणः | वारिणोः | वारीणाम् |
| सप्तमी | वारिणि | वारिणोः | वारिषु |
| सम्बोधनम् | हे वारे! | हे वारिणी! | हे वारीणि! |

**सकारान्तः ''चन्द्रमस्'' ( चन्द्रमा ) शब्दः ( हलन्त पुंल्लिङ्गः )**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | चन्द्रमाः | चन्द्रमसौ | चन्द्रमसः |
| द्वितीया | चन्द्रमसम् | चन्द्रमसौ | चन्द्रमसः |
| तृतीया | चन्द्रमसा | चन्द्रमाभ्याम् | चन्द्रमाभिः |
| चतुर्थी | चन्द्रमसे | चन्द्रमाभ्याम् | चन्द्रमाभ्यः |
| पञ्चमी | चन्द्रमसः | चन्द्रमाभ्याम् | चन्द्रमाभ्यः |
| षष्ठी | चन्द्रमसः | चन्द्रमसोः | चन्द्रमसाम् |
| सप्तमी | चन्द्रमसि | चन्द्रमसोः | चन्द्रमस्सु |
| सम्बोधनम् | हे चन्द्रमसः! | हे चन्द्रमसौ! | हे चन्द्रमसः! |

**तकारान्तः ''मरुत्'' ( वायु ) शब्दः ( हलन्त पुंल्लिङ्गः )**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | मरुत् | मरुतौ | मरुतः |
| द्वितीया | मरुतम् | मरुतौ | मरुतः |
| तृतीया | मरुता | मरुद्भ्याम् | मरुद्भ्यः |
| चतुर्थी | मरुते | मरुद्भ्याम् | मरुदिभः |
| पञ्चमी | मरुतः | मरुद्भ्याम् | मरुद्भ्यः |
| षष्ठी | मरुतः | मरुतोः | मरुताम् |
| सप्तमी | मरुति | मरुतोः | मरुत्सु |
| सम्बोधनम् | हे मरुत्-द्! | हे मरुतौ! | हे मरुतः! |

### हलन्तः पुंल्लिङ्गः 'राजन्' ( राजा ) शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | राजा | राजानौ | राजानः |
| द्वितीया | राजानम् | राजानौ | राज्ञः |
| तृतीया | राज्ञा | राजभ्याम् | राजभिः |
| चतुर्थी | राज्ञे | राजभ्याम् | राजभ्यः |
| पञ्चमी | राज्ञः | राजभ्याम् | राजभ्यः |
| षष्ठी | राज्ञः | राज्ञोः | राज्ञाम् |
| सप्तमी | राज्ञि, राजनि | राज्ञोः | राजसु |
| सम्बोधनम् | हे राजन्! | हे राजानौ! | हे राजानः! |

### हलन्तः पुंल्लिङ्गः 'महत्' ( बड़ा ) शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | महान् | महान्तौ | महान्तः |
| द्वितीया | महान्तम् | महान्तौ | महतः |
| तृतीया | महता | महद्भ्याम् | महद्भिः |
| चतुर्थी | महते | महद्भ्याम् | महद्भ्यः |
| पञ्चमी | महतः | महद्भ्याम् | महद्भ्यः |
| षष्ठी | महतः | महतोः | महताम् |
| सप्तमी | महति | महतोः | महत्सु |
| सम्बोधनम् | हे महन्! | हे महान्तौ! | हे महान्तः! |

### हलन्तः नपुंसकलिङ्गः 'महत्' ( बड़ा ) शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | महत् | महती | महन्ति |
| द्वितीया | महत् | महती | महन्ति |

तृतीयातः सप्तमीपर्यन्तं पुंल्लिङ्गवद् रूपाणि भवन्ति।

**हलन्तः स्त्रीलिङ्गः 'महती' ( बड़ा ) शब्दः**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | महती | महत्यौ | महत्यः |
| द्वितीया | महतीम् | महत्यौ | महतीः |
| तृतीया | महत्या | महतीभ्याम् | महतीभिः |
| चतुर्थी | महत्यै | महतीभ्याम् | महतीभ्यः |
| पञ्चमी | महत्याः | महतीभ्याम् | महतीभ्यः |
| षष्ठी | महत्याः | महत्योः | महतीनाम् |
| सप्तमी | महत्याम् | महत्योः | महतीषु |
| सम्बोधनम् | हे महति! | हे महत्यौ! | हे महत्यः! |

**पुंल्लिङ्गः 'सर्व' ( सब ) शब्दः**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | सर्वः | सर्वौ | सर्वे |
| द्वितीया | सर्वम् | सर्वौ | सर्वान् |
| तृतीया | सर्वेण | सर्वाभ्याम् | सर्वैः |
| चतुर्थी | सर्वस्मै | सर्वाभ्याम् | सर्वेभ्यः |
| पञ्चमी | सर्वस्मात् | सर्वाभ्याम् | सर्वेभ्यः |
| षष्ठी | सर्वस्य | सर्वयोः | सर्वेषाम् |
| सप्तमी | सर्वस्मिन् | सर्वयोः | सर्वेषु |

**स्त्रीलिङ्गः 'सर्व' ( सब ) शब्दः**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | सर्वा | सर्वे | सर्वाः |
| द्वितीया | सर्वाम् | सर्वे | सर्वाः |
| तृतीया | सर्वया | सर्वाभ्याम् | सर्वाभिः |
| चतुर्थी | सर्वस्यै | सर्वाभ्याम् | सर्वाभ्यः |
| पञ्चमी | सर्वस्याः | सर्वाभ्याम् | सर्वाभ्यः |
| षष्ठी | सर्वस्याः | सर्वयोः | सर्वासाम् |
| सप्तमी | सर्वस्याम् | सर्वयोः | सर्वासु |

**नपुंसकलिङ्गः 'सर्व' ( सब ) शब्दः**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | सर्वम् | सर्वे | सर्वाणि |
| द्वितीया | सर्वम् | सर्वे | सर्वाणि |

तृतीयातः सप्तमीपर्यन्तं पुंल्लिङ्गवद् रूपाणि भवन्ति। तथा सर्वनामशब्देषु सम्बोधनं न भवति।

**'कति' ( कितने ) शब्दः**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | — | — | कति |
| द्वितीया | — | — | कति |
| तृतीया | — | — | कतिभिः |
| चतुर्थी | — | — | कतिभ्यः |
| पञ्चमी | — | — | कतिभ्यः |
| षष्ठी | — | — | कतीनाम् |
| सप्तमी | — | — | कतिषु |

कति शब्दः नित्यबहुवचनान्तः अस्ति। तथा त्रिषु लिङ्गेषु एवमेव रूपाणि भवन्ति।

**सकारान्तः पुंल्लिङ्गः 'अदस्' ( वह ) शब्दः**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | असौ | अमू | अमी |
| द्वितीया | अमुम् | अमू | अमून् |
| तृतीया | अमुना | अमूभ्याम् | अमीभिः |
| चतुर्थी | अमुष्मै | अमूभ्याम् | अमीभ्यः |
| पञ्चमी | अमुष्मात् | अमूभ्याम् | अमीभ्यः |
| षष्ठी | अमुष्य | अमुयोः | अमीषाम् |
| सप्तमी | अमुष्मिन् | अमुयोः | अमीषु |

**सकारान्तः स्त्रीलिङ्गः 'अदस्' (वह) शब्दः**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | असौ | अमू | अमूः |
| द्वितीया | अमूम् | अमू | अमूः |
| तृतीया | अमुया | अमूभ्याम् | अमूभिः |
| चतुर्थी | अमुष्यै | अमूभ्याम् | अमूभ्यः |
| पञ्चमी | अमुष्याः | अमूभ्याम् | अमूभ्यः |
| षष्ठी | अमुष्याः | अमुयोः | अमूषाम् |
| सप्तमी | अमुष्याम् | अमुयोः | अमूषु |

**सकारान्तः नपुंसकलिङ्गः 'अदस्' (वह) शब्दः**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | अदः | अमू | अमूनि |
| द्वितीया | अदः | अमू | अमूनि |

तृतीयातः सप्तमीपर्यन्तम् पुंल्लिङ्गवद् रूपाणि भवन्ति।

**मकारान्त पुंल्लिङ्गः 'इदम्' (यह) शब्दः**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | अयम् | इमौ | इमे |
| द्वितीया | इमम् | इमौ | इमान् |
| तृतीया | अनेन | आभ्याम् | एभिः |
| चतुर्थी | अस्मै | आभ्याम् | एभ्यः |
| पञ्चमी | अस्मात् | आभ्याम् | एभ्यः |
| षष्ठी | अस्य | अनयोः | एषाम् |
| सप्तमी | अस्मिन् | अनयोः | एषु |

**मकारान्तः स्त्रीलिङ्गः 'इदम्' (यह) शब्दः**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | इयम् | इमे | इमाः |
| द्वितीया | इमाम् | इमे | इमाः |
| तृतीया | अनया | आभ्याम् | आभिः |
| चतुर्थी | अस्यै | आभ्याम् | आभ्यः |
| पञ्चमी | अस्याः | आभ्याम् | आभ्यः |
| षष्ठी | अस्याः | अनयोः | आसाम् |
| सप्तमी | अस्याम् | अनयोः | आसु |

**मकारातः नपुंसकलिङ्ग 'इदम्' (यह) शब्दः**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | इदम् | इमे | इमानि |
| द्वितीया | इदम् | इमे | इमानि |

तृतीयातः सप्तमीपर्यन्तं पुंल्लिङ्गवद् रूपाणि भवन्ति।

# धातुरूपाणि

## परस्मैपदम्

**'पठ्' (पढ़ना) धातुः, विधिलिङ्लकारः (चाहिए अर्थ में)**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पठेत् | पठेताम् | पठेयुः |
| मध्यमपुरुषः | पठेः | पठेतम् | पठेत |
| उत्तमपुरुषः | पठेयम् | पठेव | पठेम |

**'गम्' (जाना) धातुः, विधिलिङ्लकारः**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | गच्छेत् | गच्छेताम् | गच्छेयुः |
| मध्यमपुरुषः | गच्छेः | गच्छेतम् | गच्छेत |
| उत्तमपुरुषः | गच्छेयम् | गच्छेव | गच्छेम |

एवमेव वद्, जीव्, स्मृ, लिख्, हस्, खाद्, क्रीड्, पत् इत्यादीनां धातूनां रूपाणि भवन्ति।

# आत्मनेपदम्

'लभ्' ( पाना ) धातुः, लट्लकारः ( वर्तमानकाले )

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | लभते | लभेते | लभन्ते |
| मध्यमपुरुषः | लभसे | लभेथे | लभध्वे |
| उत्तमपुरुषः | लभे | लभावहे | लभामहे |

'लभ्' ( पाना ) धातुः, लङ्लकारः ( भूतकाले )

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अलभत | अलभेताम् | अलभन्त |
| मध्यमपुरुषः | अलभथाः | अलभेथाम् | अलभध्वम् |
| उत्तमपुरुषः | अलभे | अलभावहि | अलभामहि |

'लभ्' ( पाना ) धातुः, लृट्लकारः ( भविष्यकाले )

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | लप्स्यते | लप्स्येते | लप्स्यन्ते |
| मध्यमपुरुषः | लप्स्यसे | लप्स्येथे | लप्स्यध्वे |
| उत्तमपुरुषः | लप्स्ये | लप्स्यावहे | लप्स्यामहे |

'सेव्' ( सेवा करना ) धातुः, लट्लकारः ( वर्तमानकाले )

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | सेवते | सेवेते | सेवन्ते |
| मध्यमपुरुषः | सेवसे | सेवेथे | सेवध्वे |
| उत्तमपुरुषः | सेवे | सेवावहे | सेवामहे |

'सेव्' ( सेवा करना ) धातुः, लङ्लकारः ( भूतकाले )

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | असेवत | असेवेताम् | असेवन्त |
| मध्यमपुरुषः | असेवथाः | असेवेथाम् | असेवध्वम् |
| उत्तमपुरुषः | असेवे | असेवावहि | असेवामहि |

'सेव्' ( सेवा करना ) धातुः लृट्लकारः ( भविष्यकाले )

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | सेविष्यते | सेविष्येते | सेविष्यन्ते |
| मध्यमपुरुषः | सेविष्यसे | सेविष्येथे | सेविष्यध्वे |
| उत्तमपुरुषः | सेविष्ये | सेविष्यावहे | सेविष्यामहे |

एवमेव रुच्, रम्, भाष्, सह्, शिक्ष्, वृत्, वृध्, शुभ्, यत् इत्यादीनां धातूनां रूपाणि भवन्ति।

## संस्कृतसङ्ख्या

| | | | | | |
|---|---|---|---|---|---|
| एकविंशतिः | — | 21 | षट्त्रिंशत् | — | 36 |
| द्वाविंशतिः | — | 22 | सप्तत्रिंशत् | — | 37 |
| त्रयोविंशतिः | — | 23 | अष्टात्रिंशत् | — | 38 |
| चतुर्विंशतिः | — | 24 | नवत्रिंशत् / एकोनचत्वारिंशत् | — | 39 |
| पञ्चविंशतिः | — | 25 | चत्वारिंशत् | — | 40 |
| षड्विंशतिः | — | 26 | एकचत्वारिंशत् | — | 41 |
| सप्तविंशतिः | — | 27 | द्विचत्वारिंशत् | — | 42 |
| अष्टाविंशतिः | — | 28 | त्रिचत्वारिंशत् | — | 43 |
| नवविंशतिः / एकोनत्रिंशत् | — | 29 | चतुश्चत्वारिंशत् | — | 44 |
| त्रिंशत् | — | 30 | पञ्चचत्वारिंशत् | — | 45 |
| एकत्रिंशत् | — | 31 | षट्चत्वारिंशत् | — | 46 |
| द्वात्रिंशत् | — | 32 | सप्तचत्वारिंशत् | — | 47 |
| त्रयस्त्रिंशत् | — | 33 | अष्टचत्वारिंशत् | — | 48 |
| चतुस्त्रिंशत् | — | 34 | नवचत्वारिंशत् / एकोनपञ्चाशत् | — | 49 |
| पञ्चत्रिंशत् | — | 35 | पञ्चाशत् | — | 50 |

# सन्धि-परिचयः

सन्धिः अर्थात् मेलनम्। वर्णयोः वर्णानां वा मेलनं सन्धिः। द्वयोः वर्णयोः बहूनां वर्णानां वा संयोगेन यः रूपान्तरः जायते सः सन्धिः।

षष्ठ्यां सप्तम्यां च कक्षायां छात्राः स्वरव्यञ्जनसन्धी विस्तृतरूपेण पठितवन्तः। अतः अष्टम्यां कक्षायां स्वरव्यञ्जनसन्धी संक्षेपेण तथा च विसर्गसन्धिः विस्तृतरूपेण पाठ्यक्रमे समावेशितः।

## स्वरसन्धिः

| | | | | | |
|---|---|---|---|---|---|
| विद्या + आलयः | = | विद्यालयः | मुनि + इन्द्रः | = | मुनीन्द्रः |
| साधु + उक्तिः | = | साधूक्तिः | पितृ + ऋणम् | = | पितॄणम् |
| गज + इन्द्रः | = | गजेन्द्रः | महा + उत्सवः | = | महोत्सवः |
| देव + ऋषिः | = | देवर्षिः | तव + लृकारः | = | तवल्कारः |
| एक + एकम् | = | एकैकम् | राज + ऐश्वर्यम् | = | राजैश्वर्यम् |
| जल + ओघः | = | जलौघः | सुख + ऋतः | = | सुखार्तः |
| यदि + अपि | = | यद्यपि | सु + आगतम् | = | स्वागतम् |
| पितृ + आज्ञा | = | पित्राज्ञा | प्रति + एकम् | = | प्रत्येकम् |
| मधु + अरिः | = | मध्वरिः | वने + अपि | = | वनेऽपि |
| चे + अनम् | = | चयनम् | हरे + अत्र | = | हरेऽत्र |
| भो + अनम् | = | भवनम् | को + अपि | = | कोऽपि |
| गै + अकः | = | गायकः | पौ + अकः | = | पावकः |

## व्यञ्जनसन्धिः

| | | | | | |
|---|---|---|---|---|---|
| सत् + जनः | = | सज्जनः | दुष् + तः | = | दुष्टः |
| उत् + डीनः | = | उड्डीनः | सत् + आचारः | = | सदाचारः |
| अच् + अन्तः | = | अजन्तः | सद् + कारः | = | सत्कारः |
| तद् + परः | = | तत्परः | धर्मम् + चर | = | धर्मं चर |
| पुस्तकम् + पठति | = | पुस्तकं पठति | वाक् + ईशः | = | वागीशः |
| जगत् + ईशः | = | जगदीशः | तत् + लीनः | = | तल्लीनः |
| दिक् + गजः | = | दिग्गजः | सद् + पुत्रः | = | सत्पुत्रः |

## विसर्गसन्धिः

**परिभाषा**—विसर्गेण सह स्वरस्य अथवा व्यञ्जनस्य मेलनेन यः विकारः भवति सः विसर्गसन्धिः।

**यथा**- मनः + रथः = मनोरथः  मनः + हरः = मनोहरः

**नियमा: निम्नाङ्किता वर्तन्ते —**

1. विसर्गानन्तरं 'च्' अथवा 'छ्' स्यात् तदा विसर्गस्य स्थाने 'श्' भवति।

| | | | |
|---|---|---|---|
| यथा– | रामः + चलति | = | रामश्चलति |
| | बालकः + चलति | = | बालकश्चलति |
| | कः + चित् | = | कश्चित् |
| | उत्तमः + छात्रः | = | उत्तमश्छात्रः |

2. यदि विसर्गपश्चात् 'त्' अथवा 'थ्' स्यात् तदा विसर्गस्य स्थाने 'स्' भवति।

| | | | |
|---|---|---|---|
| यथा– | रामः + तिष्ठति | = | रामस्तिष्ठति |
| | जनाः + तिष्ठन्ति | = | जनास्तिष्ठन्ति |
| | नमः + ते | = | नमस्ते |
| | यशः + तनोति | = | यशस्तनोति |
| | नरः + तरति | = | नरस्तरति |

3. यदि विसर्गात् पूर्वम् अथवा अनन्तरम् 'अ' स्यात् तदा 'अ'–विसर्गयोः स्थाने 'ओ' भवति तथा अनन्तरं यः अकारः तस्य अवग्रहः (ऽ) भवति।

| | | | |
|---|---|---|---|
| यथा– | कः + अयम् | = | कोऽयम् |
| | कः + अपि | = | कोऽपि |
| | रामः + अस्ति | = | रामोऽस्ति |
| | शिवः + अर्च्यः | = | शिवोऽर्च्यः |
| | रामः + अवदत् | = | रामोऽवदत् |

4. यदि विसर्गात् पूर्वम् 'अ' तथा अनन्तरम् 'अ' ह्रस्वं स्वरं त्यक्त्वा अन्यः कोऽपि स्वरवर्णः स्यात् तदा विसर्गस्य लोपः भवति।

| | | | |
|---|---|---|---|
| यथा– | कः + आगच्छति | = | क आगच्छति |
| | देव : + इति | = | देव इति |
| | रामः + उवाच | = | राम उवाच |
| | सूर्यः + उदेति | = | सूर्य उदेति |
| | रामः + आगच्छति | = | राम आगच्छति |

5. यदि विसर्गात् पूर्वम् 'अ' अनन्तरं च कोऽपि मृदुव्यञ्जन-वर्णः स्यात् अर्थात् वर्गाणां तृतीयः, चतुर्थः, पञ्चमः वर्णः तथा य्, र्, ल्, व्, ह् भवति तदा पूर्वस्य अकारस्य विसर्गस्य च स्थाने ओ भवति।

| | | | |
|---|---|---|---|
| यथा– | शिवः + वन्द्यः | = | शिवो वन्द्यः |
| | राम : + गच्छति | = | रामो गच्छति |
| | देवः + गच्छति | = | देवो गच्छति |
| | रामः + वदति | = | रामो वदति |
| | बालः + हसति | = | बालो हसति |

6. यदि विसर्गात् पूर्वम् 'आ' अनन्तरं कोऽपि स्वरः अथवा कोऽपि मृदु-व्यञ्जनवर्णः अर्थात् वर्गाणां तृतीयः, चतुर्थः, पञ्चमः वर्णः तथा य्, र्, ल्, व्, ह् भवति तदा विसर्गस्य लोपः भवति।

| | | | |
|---|---|---|---|
| यथा– | देवाः + आगताः | = | देवा आगता |
| | नराः + यान्ति | = | नरा यान्ति |
| | बालकाः + वदन्ति | = | बालका वदन्ति |
| | जनाः + गताः | = | जना गताः |
| | देवाः + इह | = | देवा इह |
| | मानवाः + जायन्ते | = | मानवा जायन्ते |
| | बालाः + आगच्छन्ति | = | बाला आगच्छन्ति |

7. विसर्गात् पूर्वम् 'अ' 'आ' वर्णौ त्यक्त्वा कोऽपि अन्यः स्वरः भवति तथा विसर्गात् अनन्तरं कोऽपि स्वरः अथवा मृदु-व्यञ्जनवर्णः अर्थात् वर्गाणां तृतीयः, चतुर्थः, पञ्चमः, वर्णः तथा य्, र्, ल्, व्, ह् भवति तदा विसर्गस्य स्थाने 'र्' भवति। यदि पश्चात् स्वरः भवति तदा 'र्' स्वरेण सह मिलति तथा पश्चात् व्यञ्जन-वर्णः भवति तदा 'र्' वर्णस्य ऊर्ध्वगमनं (रेफ) भवति।

| | | | |
|---|---|---|---|
| यथा– | भानुः + उदेति | = | भानुरुदेति |
| | कवेः + गमनम् | = | कवेर्गमनम् |
| | गुरोः + आदेशः | = | गुरोरादेशः |
| | कविः + अयम् | = | कविरयम् |

8. 'सः' 'एषः' एतयोः द्वयोः विसर्गात् अनन्तरं कोऽपि व्यञ्जनवर्णः भवति तदा विसर्गस्य लोपः भवति।

| | | | |
|---|---|---|---|
| यथा– | सः + पठति | = | स पठति |
| | सः + लिखति | = | स लिखति |
| | एषः + वदति | = | एष वदति |
| | एषः + गच्छति | = | एष गच्छति |

## समासपरिचयः

समसनं समासः अर्थात् संक्षेपीकरणम् एव समासः भवति। द्वयोः पदयोः अथवा बहूनां पदानां मेलनं समासः। समासमध्ये विभक्तेः लोपः भवति।

यथा— राज्ञः पुरुषः — राजन् ङस् पुरुष सु = राजपुरुषः

**समासः षड्विधः**

द्वन्द्वो द्विगुरपि चाहं मद्गेहे नित्यमव्ययीभावः।
तत्पुरुष कर्मधारय येनाहं स्यां बहुव्रीहिः॥

**समासः**

- तत्पुरुष–समासः
- द्विगु–समासः
- कर्मधारय–समासः
- द्वन्द्व–समासः
- बहुव्रीहि–समासः
- अव्ययीभाव–समासः

**समासभेदविवेचनम्—**

### 1. तत्पुरुषसमासः

**परिभाषा—** प्रायेण उत्तरपदार्थप्रधानस्तत्पुरुषः।

यत्र पूर्वपदं द्वितीया विभक्तितः सप्तमीविभक्तिपर्यन्तं भवति एवञ्च उत्तरपदं प्रथमाविभक्त्यौ भवति तत्र (व्यधिकरण) तत्पुरुषसमासः। पूर्वपदस्य विभक्त्यानुसारमेव समासस्य नामकरणं भवति। यथा—

## द्वितीया तत्पुरुषः —

| सामासिकपदम् | समासविग्रहः |
|---|---|
| ग्रामगतः | ग्रामं गतः |
| भयप्राप्तः | भयम् प्राप्तः |
| दुःखापन्नः | दुःखम् आपन्नः |

## तृतीया तत्पुरुषः —

| | |
|---|---|
| ज्ञानशून्यः | ज्ञानेन शून्यः |
| बाणहतः | बाणेन हतः |
| आचारकुशलः | आचारेण कुशलः |
| विद्याहीनः | विद्यया हीनः |
| अग्निदग्धः | अग्निना दग्धः |

## चतुर्थी तत्पुरुषः —

| | |
|---|---|
| दीनदानम् | दीनाय दानम् |
| लोकहितम् | लोकाय हितम् |
| यूपदारु | यूपाय दारुः |
| भूतबलिः | भूतेभ्यः बलिः |

## पञ्चमी तत्पुरुषः —

| | |
|---|---|
| पापमुक्तः | पापात् मुक्तः |
| वृक्षपतितः | वृक्षात् पतितः |
| चौरभयम् | चौरात् भयम् |

## षष्ठी तत्पुरुषः —

| | |
|---|---|
| राजपुत्रः | राज्ञः पुत्रः |
| विद्यालयः | विद्यायाः आलयः |
| ईश्वरभक्तः | ईश्वरस्य भक्तः |
| परोपकारः | परेषाम् उपकारः |

**सप्तमी तत्पुरुषः —**

| | |
|---|---|
| जलमग्नः | जले मग्नः |
| युद्धनिपुणः | युद्धे निपुणः |
| कार्यचतुरः | कार्ये चतुरः |
| सभापण्डितः | सभायां पण्डितः |

तत्पुरुषसमासस्य अन्यानि उदाहरणानि—

| सामासिकपदम् | समासविग्रहः |
|---|---|
| असत्यम् | न सत्यम् |
| अद्वितीयः | न द्वितीयः |
| अलौकिकः | न लौकिकः |
| अनर्थः | न अर्थः |
| अनादरः | न आदरः |
| अनुपस्थितः | न उपस्थितः |
| अनेकः | न एकः |
| प्राचार्यः | प्रगतः आचार्यः |
| प्रपितामहः | प्रगतः पितामहः |

## 2. द्विगुसमासः —

**परिभाषा—** सङ्ख्यापूर्वो द्विगुः।

यत्र प्रथमपदसङ्ख्यावाची भवति तथा च उत्तरपदस्य विशेषतां ज्ञापयति सः द्विगुसमासः भवति। द्विगुसमासे समूहवाचकः अर्थः भवति।

| सामासिकपदम् | समासविग्रहः |
|---|---|
| त्रिभुवनम् | त्रयाणां भुवनानां समाहारः |
| चतुर्युगम् | चतुर्णां युगानां समाहारः |
| पञ्चवटी | पञ्चानां वटानां समाहारः |
| पञ्चपात्रम् | पञ्चानां पात्राणां समाहारः |
| सप्तर्षयः | सप्त च ते ऋषयः |
| अष्टाध्यायी | अष्टानाम् अध्यायानां समाहारः |

### 3. कर्मधारयसमासः —

**परिभाषा —** स चासौ कर्मधारयः।

यत्र प्रथमं पदं विशेषणम् उपमानं वा तथा द्वितीयं पदं विशेष्यम् उपमेयं वा भवति तत्र कर्मधारयसमासः भवति। यथा—

| सामासिकपदम् | समासविग्रहः |
|---|---|
| नीलोत्पलम् | नीलम् उत्पलम् |
| घनश्यामः | घन इव श्यामः |
| महापुरुषः | महान् चासौ पुरुषः |
| कृष्णसर्पः | कृष्णः च असौ सर्पः |

### 4. द्वन्द्वसमासः —

**परिभाषा —** प्रायेणोभयपदार्थप्रधानो द्वन्द्वः।

अर्थात् यत्र समेषां पदानां प्राधान्यं भवति तत्र द्वन्द्वसमासः। 'चार्थे द्वन्द्वः' अर्थात् 'च' इत्यस्यार्थे द्वन्द्वसमासः भवति।

| सामसिकपदम् | समासविग्रहः |
|---|---|
| रामलक्ष्मणौ | रामश्च लक्ष्मणश्च |
| पितरौ | माता च पिता च |
| हरिहरौ | हरिश्च हरश्च |
| हेमन्तशिशिरवसन्ताः | हेमन्तश्च शिशिरश्च वसन्तश्च |
| रामलक्ष्मणभरतशत्रुघ्नाः | रामश्च लक्ष्मणश्च भरतश्च शत्रुघ्नश्च |

### 5. बहुव्रीहिसमासः —

**परिभाषा —** प्रायेण अन्यपदार्थप्रधानो बहुव्रीहिः।

यत्र सामासिकपदेभ्यः अन्यस्य बोधः भवति सः बहुव्रीहिः। बहुव्रीहिसमासस्य अन्ते यस्य सः अथवा येन इति शब्दः भवति।

| सामासिकपदम् | समासविग्रहः |
|---|---|
| पीताम्बरः | पीतम् अम्बरं यस्य सः (विष्णुः) |
| चन्द्रशेखरः | चन्द्रः शेखरे यस्य सः (शिवः) |
| दशाननः | दश आननानि यस्य सः (रावणः) |
| सागरमेखला | सागरः मेखला यस्याः सा (भारतमाता) |

### 6. अव्ययीभावसमासः —

**परिभाषा —** प्रायेण पूर्वपदार्थप्रधानोऽव्ययीभावः।

अर्थात् यत्र प्रथमपदं प्रधानं भवति तथा च प्रथमपदम् अव्ययं भवति, द्वितीयपदं संज्ञावाचकं भवति सः अव्ययीभावसमासः। यथा—

| सामासिकपदम् | समासविग्रहः |
|---|---|
| यथाशक्तिः | शक्तिम् अनतिक्रम्य |
| उपगङ्गम् | गङ्गायाः समीपम् |
| अनुविष्णु | विष्णोः पश्चात् |
| अधिहरि | हरौ |
| अनुकृष्णम् | कृष्णस्य पश्चात् |
| प्रतिदिनम् | दिनं दिनम् |

# कारकपरिचयः

## क्रियान्वयित्वं कारकम्

यस्य पदस्य सम्बन्धः साक्षात् क्रियया सह भवति, तत् कारकम् इति कथ्यते। कारकाणि षड् भवन्ति सम्बन्धः कारकं नास्ति। किन्तु विभक्तयः सप्त भवन्ति। कारकाणां विषये कथितं यत्—

**कर्ता कर्म च करणं च सम्प्रदानं तथैव च।**
**आपादानाधिकरणमित्याहुः कारकाणि षट्॥**

| विभक्तयः | कारकाणि | चिह्नानि (हिन्दीभाषायाम् अर्थः) |
|---|---|---|
| प्रथमा | कर्ता | ने |
| द्वितीया | कर्म | को |
| तृतीया | करणम् | से, द्वारा |
| चतुर्थी | सम्प्रदानम् | के लिए |
| पञ्चमी | अपादानम् | से (अलग होने में) |
| षष्ठी | — | का,की,के, रा,री,रे |
| सप्तमी | अधिकरणम् | में, पर |
| सम्बोधनम् | — | भोः!, हे!, रे |

**विशेषः —** सम्बोधने प्रथमा विभक्तिः भवति।

**कर्ताकारकम् —**

करोति इति कर्ता। कर्ताकारके प्रथमा विभक्तिः भवति। यथा—

क. रामः पठति। ख. बालकः गच्छति।

**कर्मकारकम् —**

कर्मणि द्वितीया विभक्तिः भवति। कर्ता यम् अत्यधिकम् अभिलषति, तत् कर्मकारकम् इति उच्यते। उदाहरणानि—

क. बालकः पुस्तकं पठति। ख. रामः फलं खादति।

ग. बाला ग्रामं गच्छति।

कर्मकारके अयं विशिष्टः नियमः अस्ति—

'अभितः, परितः, समया, निकषा, प्रति, अनु, विना' इत्यादीनां योगेऽपि द्वितीया विभक्तिर्भवति। यथा— ग्रामम् अभितः पर्वताः सन्ति।

गत्यर्थकधातूनां योगे द्वितीया भवति, यथा–

क. वानरः वृक्षमारोहति। ख. सः विद्यालयं गच्छति।

**करणकारकम् —**

येन साधनेन कर्ता कार्यं संपादयति, तत् साधनं करणकारकम् इति कथ्यते। यथा—

क. गीता लेखन्या लिखति। ख. छात्रः कन्दुकेन क्रीडति।

ग. कृष्णः यानेन गच्छति।

कारकेऽस्मिन् अयं विशिष्टः नियमः अस्ति— 'सह, साकम्, सार्धम्, समम्, अलम्' इत्यादीनां योगेऽपि तृतीया विभक्तिर्भवति। यथा—

क. अहं लतया सह गच्छामि।

अत्र 'अलम्' निषेधार्थकम्। यथा — अलं विवादेन ।

शरीरस्य यत् अङ्गं विकृतं स्यात् तस्मिन् तृतीया भवति,

यथा– पादेन खञ्जः, नेत्रेण काणः, कर्णेन बधिरः।

करणबोधक—(साधन) शब्देषु तृतीया भवति, यथा–

क. श्रमेण सफलता भवति। ख. विद्यया यशः प्राप्यते।

**सम्प्रदानकारकम् —**

यस्य कृते किमपि कार्यं सम्पन्नं क्रियते तस्मै चतुर्थी विभक्तिः, सम्प्रदानकारकं भवति। यथा—

क. महेशः मित्राय धनं ददाति।।

ख. रमेशः अध्ययनाय विद्यालयं गच्छति।

सम्प्रदानकारके अयं विशिष्टः नियमः अस्ति— 'नमः, स्वस्ति, स्वाहा, स्वधा, अलम्, वषट् योगेऽपि चतुर्थी भवति। यथा—

क. श्रीगणेशाय नमः।

ख. सर्वेभ्यः स्वस्ति।

अत्र 'अलम्' अव्ययम् पर्याप्तार्थकम्। यथा — अर्जुनः कर्णाय अलम्।

रुच्यर्थकधातूनां योगे चतुर्थी भवति। यथा–

क. बालकाय मोदकं रोचते।

### अपादानकारकम् —

यस्मात् स्थानात् वस्तुनः पृथक्करणं लक्ष्यते तत् अपादानकारकम्। अपादाने पञ्चमी विभक्तिः भवति। यथा—

क. वृक्षात् पत्रं पतति।

ख. गङ्गा हिमालयात् प्रभवति।

अपादानकारके विशेष नियमः अस्ति। भय, रक्ष् इत्यर्थस्य धातूनां योगेऽपि पञ्चमी विभक्ति भवति। यथा— बालकः चौरात् विभेति।

- जुगुप्सा-विराम-प्रमादार्थकधातूनां योगे पञ्चमी भवति, यथा- पापात् विरमति।
- भय रक्षार्थकधातूनां योगेऽपि पञ्चमी भवति, यथा- चौराद् विभेति।
- अन्य-आरात्-इतर-ऋते इत्यादीनां योगेऽपि पञ्चमी भवति, यथा–
  ऋते ज्ञानात् न मुक्तिः।
- दूरम्-अन्तिकम् (समीप) इत्यर्थेऽपि पञ्चमी षष्ठी वा भवति, यथा–
  ग्रामस्य ग्रामात् वा अन्तिकम्।

### सम्बन्धः

हेतु शब्दस्य प्रयोगे षष्ठी विभक्तिः भवति। यथा —

क. भिक्षुकः अन्नस्य हेतोः वसति।

### अधिकरणम् —

अधिकरणे सप्तमी स्यात्। यथा— सुधा मार्गे चलति। साध्वसाधुशब्दयोः प्रयोगेऽपि सप्तमी भवति। यथा—

क. कृष्णः साधुः मातरि।

ख. कृष्णः असाधुः मातुले।

# प्रत्ययपरिचयः

धातोः प्रातिपदिकशब्दस्य वा अन्ते संयुज्य विशेषार्थस्य यः बोधं कारयति सः प्रत्ययः। अथवा प्रातिपादिकशब्दानां धातूनां वा अन्ते ये प्रयुज्यन्ते ते प्रत्ययाः।

यथा — कृ + क्तवतु = कृतवान्, लघु + तरप् = लघुतरः।

**प्रत्ययः द्विविधः —** कृत्प्रत्ययः तद्धितप्रत्ययश्च।

**कृत्प्रत्ययः —** ये प्रत्ययाः धातूनाम् अन्ते प्रयुज्यन्ते ते कृत्प्रत्ययाः।

यथा — क्त्वा, ल्यप्, क्तवतु, तुमुन्, क्त, इत्यादयः।

**तद्धितप्रत्ययः —** ये प्रत्ययाः प्रातिपदिकशब्दानाम् अन्ते प्रयुज्यन्ते ते तद्धितप्रत्ययाः। यथा — तरप्, तमप्, अण्, इत्यादयः।

## कृत्प्रत्ययः

### क्त, क्तवतु प्रत्ययौ ( भूतकालार्थे )

| धातुः | क्त प्रत्ययः | अर्थः | क्तवतु प्रत्ययः | अर्थः |
|---|---|---|---|---|
| पठ् | + क्त = पठितः | पढ़ा गया | + क्तवतु = पठितवान् | पढ़ा |
| क्रीड् | + क्त = क्रीडितः | खेला गया | + क्तवतु = क्रीडितवान् | खेला |
| हस् | + क्त = हसितः | हँसा गया | + क्तवतु = हसितवान् | हँसा |
| लिख् | + क्त = लिखितः | लिखा गया | + क्तवतु = लिखितवान् | लिखा |
| पत् | + क्त = पतितः | गिरा | + क्तवतु = पतितवान् | गिरा |
| गम् | + क्त = गतः | गया | + क्तवतु = गतवान् | गया |
| श्रु | + क्त = श्रुतः | सुना गया | + क्तवतु = श्रुतवान् | सुना |
| पा (पिब्) | + क्त = पीतः | पिया गया | + क्तवतु = पीतवान् | पिया |
| खाद् | + क्त = खादितः | खाया गया | + क्तवतु = खादितवान् | खाया |
| वद् | + क्त = उदितः | बोला गया | + क्तवतु = उदितवान् | बोला |

## तुमुन् प्रत्ययः ( के लिए ) चतुर्थ्याः अर्थे —

| धातुः | प्रत्ययः | शब्दः | अर्थः |
|---|---|---|---|
| पठ् | तुमुन् (तुम्) | पठितुम् | पढ़ने के लिए |
| क्रीड् | तुमुन् (तुम्) | क्रीडितुम् | खेलने के लिए |
| खाद् | तुमुन् (तुम्) | खादितुम् | खाने के लिए |
| हस् | तुमुन् (तुम्) | हसितुम् | हँसने के लिए |
| पत् | तुमुन् (तुम्) | पतितुम् | गिरने के लिए |
| वद् | तुमुन् (तुम्) | वक्तुम् | बोलने के लिए |
| लिख् | तुमुन् (तुम्) | लेखितुम् | लिखने के लिए |
| पा | तुमुन् (तुम्) | पातुम् | पीने के लिए |
| श्रु | तुमुन् (तुम्) | श्रोतुम् | सुनने के लिए |

### तद्धितप्रत्ययः

### तरप्, तमप्, प्रत्ययौ

- विशेषणशब्दानां भाववर्धनार्थं तरप् (तर), तमप् (तम) प्रत्यययोः प्रयोगः भवति।
- विशेषणशब्दानां तिस्रः अवस्थाः भवन्ति—

**क.** **सामान्य-अवस्था** — सुन्दरः = रामः सुन्दरः बालकः अस्ति।

**ख.** **उत्तर-अवस्था** — सुन्दरतरः = रामः मोहनात् सुन्दरतरः अस्ति। (द्वयोः निर्धारणार्थे तरप् प्रत्ययः भवति)

**ग.** **उत्तम-अवस्था** — सुन्दरतमः = रामः सर्वेषु बालकेषु सुन्दरतमः अस्ति। (बहुषु निर्धारणार्थे तमप् प्रत्ययः भवति)

| शब्दः | अर्थः | तरप् प्रत्यय युक्तः शब्दः | अर्थः | तमप् प्रत्यय युक्तः शब्दः | अर्थः |
|---|---|---|---|---|---|
| अल्पः | कम | अल्पतरः | अधिक कम | अल्पतमः | सबसे अधिक कम |
| लघुः | छोटा | लघुतरः | अधिक छोटा | लघुतमः | सबसे अधिक छोटा |
| गुरुः | बड़ा | गुरुतरः | अधिक बड़ा | गुरुतमः | सबसे अधिक बड़ा |
| महान् | बड़ा | महत्तरः | अधिक बड़ा | महत्तमः | सबसे अधिक बड़ा |
| उच्चः | ऊँचा | उच्चतरः | अधिक ऊँचा | उच्चतमः | सबसे अधिक ऊँचा |
| कृशः | दुर्बल | कृशतरः | अधिक दुर्बल | कृशतमः | सबसे अधिक दुर्बल |

विशेषणशब्दानां रूपाणि विशेष्यशब्दानुसारेण त्रिषु लिङ्गेषु प्रचलिष्यन्ति।

# अव्ययपरिचयः

**यन्नव्येति तदव्ययम् —**

- न-व्ययम् इति अव्ययम् अर्थात् यत् न परिवर्तते तद् अव्ययम् इति।
- यत् त्रिषु लिङ्गेषु, सर्वेषु, वचनेषु सर्वासु विभक्तिषु च समानरूपं भवति तद् अव्ययमिति कथ्यते।
- **अव्ययं पञ्चविधम् —** उपसर्गः, क्रियाविशेषणम्, चादिः, समुच्चयबोधकः, विस्मयादिबोधकश्च।
- **उपसर्गाः —** प्र, परा, अप, सम्, अनु, अव, निस्, निर्, दुस्, दुर्, वि, आङ्, नि, अधि, अपि, अति, सु, उत्, अभि, प्रति, परि, उप, एते 22 उपसर्गाः क्रियायोगे भवन्ति।

  यथा— स: प्रहरति । (मारता है)

  राम: अनुभवति । (अनुभव करता है)

- **क्रियाविशेषणानि —** स्वः (स्वर्गः) अन्तरम्, प्रातः, उच्चैः, शनैः, ऋते, विना, युगपत्, पृथक्, ह्यः, श्वः, दिवा, रात्रौ, सायम्, सहसा, नाना, यतः, ततः, यदा, तदा, यथा, तथा कदा, इदानीम्, यदि, तर्हि, इत्यादीनि।

  यथा— मोहनः प्रातः उत्तिष्ठति। (प्रातः = सबेरे)

  रामः श्वः विद्यालयं गमिष्यति। (श्वः = आने वाला कल)

- **चादिः —** च, वा, भूयः, खलु, तु, वै, मा, न इत्यादयः।

  यथा— रमेशः संस्कृतं गणितं च पठति। (च = और)

  विवेकः खलु नृत्यं करिष्यति (खलु = निश्चित)

- **समुच्चयबोधकाः —** अथ, उत, चेत्, नोचेत् इत्यादयः।

  यथा— अथ कथा प्रारभ्यते । (अथ = आरम्भ सूचक शब्द)

  बुभुक्षा अस्ति चेत् खादतु नोचेत् मा खादतु। (चेत् = यदि, नोचेत् = यदि नहीं)

- **विस्मयादिबोधकाः —** अहह, अहो, बत, हा, इत्यादयः।

  यथा— अहो ! कियत् भयङ्करः सर्पः। (अहो = आश्चर्य सूचक)

  हा ! सज्जनः पीडितः दुर्जनेन (हा = कष्टसूचक)

- **सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।**
  **वचनेषु च सर्वेषु यन्नव्येति तदव्ययम्॥**

# अव्ययप्रयोगः

| अव्ययम् | | वाक्यप्रयोगः |
|---|---|---|
| तथापि | – | बुभुक्षा अस्ति <u>तथापि</u> न खादामि। |
| सहसा | – | <u>सहसा</u> सिंहः कूपे अकूर्दत्। |
| मिथ्या | – | ब्रह्म सत्यं जगत् <u>मिथ्या</u> अस्ति। |
| बहुधा | – | सफलतायाः सूत्राणि <u>बहुधा</u> सन्ति। |
| प्रायः | – | <u>प्रायः</u> सर्वे जनाः धनमिच्छन्ति। |
| कृते | – | सः भोजनस्य <u>कृते</u> भोजनालयं गच्छति। |
| खलु | – | कष्टप्रदा <u>खलु</u> दरिद्रता। |
| तर्हि | – | यदि पिपासा नास्ति <u>तर्हि</u> कथं पिबति। |
| दूरम् | – | विद्यालयः गृहाद् <u>दूरं</u> नास्ति। |
| नित्यम् | – | भक्तः <u>नित्यम्</u> ईश्वरं भजति। |
| परन्तु | – | अहं पठितुमिच्छामि <u>परन्तु</u> पुस्तकं नास्ति। |
| अग्रतः | – | मम गृहस्य <u>अग्रतः</u> एव मन्दिरमस्ति। |

# निबन्ध-रचना

## पुस्तकम्

1. पुस्तकानि मह्यम् अतीव रोचन्ते।
2. मम समीपे बहूनि पुस्तकानि सन्ति।
3. पुस्तकानि अतीव मनोहराणि सन्ति।
4. मम समीपे चित्रपुस्तकम् अपि अस्ति।
5. रमणीयं चित्रं चित्तम् आनन्दयति।
6. पुस्तकानि ज्ञानस्य भण्डारः भवन्ति।
7. पुस्तकानि अस्माकं मित्राणि सन्ति।
8. पुस्तकानां सङ्गतिः लाभप्रदा भवति।
9. अस्माभिः पुस्तकानि रक्षणीयानि।
10. स्वगृहे लघुः पुस्तकालयो निर्मातव्यः।
11. पुस्तकेषु यत्र कुत्रचित् न लेखनीयम्।

## उद्यानम्

1. उद्यानम् अत्यन्तं रमणीयं भवति।
2. जनाः उद्याने भ्रमणार्थं गच्छन्ति।
3. बालकाः उद्याने क्रीडन्ति।
4. उद्याने तडागः अपि अस्ति।
5. उद्याने वृक्षाः रोहन्ति।
6. वृक्षाः पर्णैः पुष्पैः फलैः च शोभन्ते।
7. खगाः वृक्षेषु निवसन्ति।
8. तत्र ते नीडान् रचयन्ति।
9. प्रभाते खगानां कूजनं मनोहरं भवति।
10. वर्तमानकाले वृक्षारोपणकार्यं तीव्रगत्या प्रसरति।

## विद्यालयः

1. मम विद्यालयः 'गुराडियामाता' ग्रामे स्थितः अस्ति।
2. विद्यालयस्य भवनम् अतीवसुन्दरम् अस्ति।
3. अहम् प्रतिदिनं विद्यालयं गच्छामि।
4. अहं विद्यालयं गत्वा गुरून् प्रणमामि।
5. गुरवः स्नेहेन पाठं पाठयन्ति।
6. विद्यालये एकम् उद्यानम् अपि अस्ति।
7. विद्यालये एकः पुस्तकालयः अस्ति।
8. विद्यालये एकं विशालं क्रीडाक्षेत्रम् अस्ति।
9. तत्र छात्राः क्रीडन्ति।
10. विद्यालयः मह्यम् अतीव रोचते।

## धेनुः

1. धेनुः अस्माकं माता अस्ति।
2. धेनोः चत्वारः पादाः द्वे शृङ्गे एकं लाङ्गूलं च भवति।
3. धेनूनां विविधाः वर्णाः भवन्ति।
4. धेनुः तृणानि भक्षयति।
5. धेनुः जनेभ्यः मधुरं पयः प्रयच्छति।
6. गोमूत्रेण विविधानां दोषाणां रोगाणां च नाशः भवति।
7. धेनोः दुग्धेन दधि, तक्रम्, नवनीतम्, घृतं च निर्मितं भवति।
8. भारतीयसंस्कृतौ धेनूनां महत्त्वम् अधिकम् अस्ति।
9. धेनोः दुग्धं मधुरम् पथ्यं हितकारि च भवति।
10. वयं धेनुं मातृरूपेण पूजयामः।

## महापुरुषः — आजादचन्द्रशेखरः

1. महांश्चासौ पुरुषः इति महापुरुषः।
2. पुरुषः महत्कार्यं कृत्वा महापुरुषः भवति।
3. समाजहितार्थं राष्ट्रहितार्थं च यानि कार्याणि भवन्ति, तानि एव महत्कार्याणि भवन्ति।
4. चन्द्रशेखरः आजादः एवमेव राष्ट्रसेवी महापुरुषः अस्ति।
5. 1906 ख्रीस्ताब्दे आजादचन्द्रशेखरस्य जन्म अभवत्।
6. अस्य जन्मभूमिः अलीराजपुरमण्डलस्य 'भाभरा' नामकग्रामे अस्ति।
7. तस्य पिता सीतारामतिवारी, माता च जगरानीदेवी आसीत्।
8. चन्द्रशेखरस्य अध्ययनं वाराणस्यां संस्कृतविद्यालये अभवत्।
9. सः हिन्दुस्तान-सोसलिस्ट-रिपब्लिकन-आर्मी नाम्ना सङ्घटनं कृतवान्।
10. आजादचन्द्रशेखरः 1931 ख्रिस्ताब्दे इलाहबादनगरे (प्रयागनगरे) वीरगतिं प्राप्नोत्।

# अभ्यास–प्रश्नपत्रप्रारूपम्

## विषयः – संस्कृतम्

## कक्षा– अष्टमी

---

प्रश्नः 1 (अ) समुचितपदं चित्वा लिखत–

(क) कार्यक्षेत्रे –

(अ) तरणीयम् (ब) त्वरणीयम् (स) वदनीयम् (द) स्मरणीयम्

(ख) गुरुत्वाकर्षणस्य सिद्धान्तः विवेचितः–

(अ) आदित्यदासेन (ब) आर्यभटेन (स) वराहमिहिरेण (द) मोहनदासेन

(ग) वसन्तपञ्चमी पर्व भवति –

(अ) फाल्गुनमासे (ब) माघमासे (स) चैत्रमासे (द) कार्तिकमासे

(घ) अहिल्याबाई इत्यस्याः पत्युः नाम आसीत् –

(अ) दामोदररावः (ब) खण्डेरावः (स) कृष्णरावः (द) श्यामरावः

(ङ) सर्वः पश्यतु –

(अ) दूरदर्शनम् (ब) कार्याणि (स) अभद्राणि (द) भद्राणि

(ब) प्रदत्तैः शब्दैः रिक्तस्थानानि पूरयत–

(प्रकृतिहिताय, रामकृष्णपरमहंसः, मेकलसुता, शीलं, एकादशवर्षाणि)

(क) नर्मदायाः अपरं नाम ..................................अस्ति।

(ख) ....................................सर्वत्र वै धनम्।

(ग) प्रवर्ततां ....................................पार्थिवः।

(घ) चित्रकूटे रामचन्द्रः ............................यावत् निवासं कृतवान्।

(ङ) स्वामिविवेकानन्दस्य गुरुः ................................आसीत्।

प्रश्नः 2 अधोलिखितगद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृते लिखत–

कस्मिंश्चित् वने निम्बवृक्षे एकं चटकायुगलं प्रतिवसति स्म। समये चटकया अण्डानि दत्तानि, युगलम् अति प्रसन्नम् आसीत्। एकस्मिन् दिने आतपपीडितः एकः मदमत्तः गजः तत्र आगतः। मदेन सः तस्य वृक्षस्य तां शाखां नाशितवान् यस्यां शाखायां चटकायाः अण्डानि आसन्। अतः अण्डानि अपि नष्टानि।

(क) चटकायुगलं कस्मिन् वृक्षे प्रतिवसति स्म?

(ख) अण्डानि कया दत्तानि?

(ग) एकस्मिन् दिने कः तत्र आगतः?

(घ) मदेन गजः कां नाशितवान् ?

**अथवा**

एकदा विक्रमादित्यः नगरभ्रमणसमये एकं मरणासन्नं रुग्णं दृष्टवान्। तस्य दर्शनेन मनसि वैराग्यम् उद्भूतम्। अतः मायामोहमयं संसारं ज्ञात्वा सः महामन्त्रिणि राज्यभारं समर्प्य वनम् अगच्छत्।

(क) विक्रमादित्यः नगरभ्रमणसमये कं दृष्टवान्?

(ख) विक्रमादित्यस्य मनसि किम् उद्भूतम्?

(ग) सः महामन्त्रिणि किं समर्प्य वनम् अगच्छत्?

(घ) 'अगच्छत्' इत्यस्मिन् पदे कः धातुः?

प्रश्नः 3 अधोलिखितपद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृते लिखत–

उद्योगे नास्ति दारिद्र्यं जपतो नास्ति पातकम्।
मौने च कलहो नास्ति नास्ति जागरिते भयम्।।

(क) उद्योगे किं नास्ति? (ख) जपतो किं नास्ति?

(ग) भयं कदा नास्ति?

(घ) 'मौने' इत्यस्मिन् पदे का विभक्तिः किं च वचनम्?

**अथवा**

माता गुरुतरा भूमेः खात्पितोच्चतरस्तथा।
मनः शीघ्रतरं वाताच्चिन्ता बहुतरी तृणात्।।

(क) भूमेः गुरुतरा का? (ख) खात् उच्चतरः कः?

(ग) वातात् शीघ्रतरं किम्? (घ) 'तृणात्' इत्यस्मिन् पदे विभक्तिं वचनं च लिखत?

प्रश्नः 4 (अ) पाठ्यपुस्तकात् कण्ठस्थीकृतम् एकं सुभाषितश्लोकं लिखत यः अस्मिन् प्रश्नपत्रे नास्ति।

(ब) श्लोकपूर्तिं कुरुत–

विना वेदं विना ........................., विना ......................कथाम्।
विना ........................., .......................... भारतं न हि।।

(स) पाठ्यपुस्तकात् कण्ठस्थीकृताम् एकां सूक्तिं लिखत।

प्रश्नः5 (अ) अधोलिखितेषु (5) पञ्चप्रश्नानाम् उत्तराणि एकपदेन संस्कृते लिखत–

(क) कस्मिन् मासे गणतन्त्रदिवसः भवति?

(ख) विद्या कीदृशी भवेत्?

(ग) विषपानं कः कृतवान्?

(घ) चन्द्रशेखरस्य पितुः नाम किम्?

(ङ) नर्मदा कस्मात् स्थानात् प्रादुर्भवति?

(च) अहिल्यायाः जन्मग्रामः कः?

(छ) मेघदूतस्य कविः कः?

(ब) अधोलिखितेषु (5) पञ्चप्रश्नानाम् उत्तराणि एकवाक्येन संस्कृते लिखत–

(क) कुत्र चरणीयम्?

(ख) गुणेषु कः करणीयः ?

(ग) यूनां प्रेरकः पथप्रदर्शकश्च कः?

(घ) चित्रकूटे कः विश्वविद्यालयः अस्ति?

(ङ) विक्रमादित्यस्य ध्येयवाक्यं किम् आसीत्?

(च) काशीतलवाहिनी का?

(छ) पञ्चशाकानां नामानि लिखत?

प्रश्नः6 (अ) अधोलिखितेषु (2) द्वयोः शब्दरूपाणि निर्देशानुसारं त्रिषु वचनेषु लिखत–

(क) बालक – प्रथमा (ख) मातृ – द्वितीया (ग) राजन् – षष्ठी

(ब) अधोलिखितेषु (2) द्वयोः धातुरूपाणि निर्देशानुसारं त्रिषु वचनेषु लिखत

(क) वद् – लट्लकारः (वर्तमानकालः) प्रथमपुरुषः।

(ख) सेव् – लृट्लकारः (भविष्यकालः) मध्यमपुरुषः।

(ग) लिख् – लङ्लकारः (भूतकालः) उत्तमपुरुषः।

(स) अधोलिखितेषु (4) चत्वारि अशुद्धवाक्यानि शुद्धं **कुरुत**–

(क) श्रीगणेशं नमः (ख) सः पुस्तकं पठसि।

(ग) कृष्णः यानात् गच्छति। (घ) छात्रः फलं खादामि।

(ङ) लक्ष्मणः रामस्य सह क्रीडति। (च) गीता बालकं भोजनं ददाति।

प्रश्नः7 (अ) अधोलिखितेषु (3) त्रयाणां धातुं प्रत्ययं च पृथक् **कुरुत–**

(क) पठितुम् (ब) गत्वा (ग) गतः (घ) खादितवान्

(ब) अधोलिखितेषु (2) द्वौ उपसर्गौ योजयित्वा पदनिर्माणं **कुरुत–**

(क) प्र (ख) अनु (ग) सु

(स) अधोलिखितेषु (2) द्वयो अव्ययोः प्रयोगं कृत्वा वाक्यनिर्माणं **कुरुत–**

(क) अद्य (ख) न (ग) प्रायः

प्रश्नः8 (अ) अधोलिखितेषु (3) त्रयाणां पदानां सन्धिविच्छेदं कृत्वा सन्धिनाम लिखत–

(क) विद्यालयः (ख) सज्जनः (ग) नमस्ते (घ) महोत्सवः

(ब) अधोलिखितेषु (3) त्रयाणां पदानां समासविग्रहं कृत्वा समासनाम लिखत–

(क) राजपुत्रः (ख) महापुरुषः (ग) पितरौ (घ) चन्द्रशेखरः

(स) अधोलिखितेषु (3) तिस्रः **सङ्ख्याः** संस्कृते लिखत–

(क) 28 (ख) 36 (ग) 41 (घ) 46

प्रश्नः9 अधोलिखितपदैः पत्रं पूरयत–

(पीडितः, अवकाशं, निवेदनम्, अद्य, आगन्तुं)

सेवायाम्,

श्रीमान् प्रधानाध्यापकमहोदयः

शासकीयमाध्यमिकविद्यालयः

जाबालिपुरम्

महोदय!

विनम्रं.........................अस्ति यत् अहम्.....................शीतज्वरेण.......................
अस्मि। अत एव विद्यालयम्....................न शक्नोमि। अतः एकदिवसीयम् ..............
स्वीकरोतु।

भवतः आज्ञाकारी शिष्यः

दिनाङ्कः – 22 फरवरीमासः 2009 ई. अजयः

अष्टमकक्षा

प्रश्नः10 अधोलिखितेषु एकस्मिन् विषये दशवाक्येषु संस्कृते निबन्धं लिखत–

(क) धेनुः (ख) विद्यालयः (ग) उद्यानम् (घ) पुस्तकम्

# लाडो अभियान

## "बच्चों का भविष्य दांव पर न लगाए, उन्हें पढ़ने आगे बढ़ने का मौका दें"

"18 वर्ष से कम उम्र की बालिका व 21 वर्ष से कम उम्र के बालक का विवाह, कानूनन अपराध है। ऐसे विवाह में शामिल सभी व्यक्ति अपराधी की श्रेणी में आते है चाहे वह जनसामान्य हो, या विवाह में सेवा देने वाले सेवा प्रदाता, बाल विवाह में उपस्थित व सम्मिलित होने पर 2 वर्ष का कठोर कारावास या, 1,00000-/ (एक लाख) का जुर्माना या दोनों हो सकते हैं।

बाल विवाह की सूचना जिला कलेक्टर, आंगनवाड़ी केन्द्र, शिक्षक, पुलिस थाना, चाईल्ड लाईन 1098, हेल्प लाईन 1090, पत्राकार, पंच, सरपंच आदि को देकर बच्चों के भविष्य को सुरक्षित कर सकते है"

## समग्र स्वच्छता अभियान संदेश

1. खाना खाने के पहले हाथ धोएँ।
2. शौच के बाद साबुन से हाथों को अवश्य धोएँ।
3. शौच के लिए शौचालय में ही जाएँ।
4. घड़े में से पानी डंडी वाले लोटे से ही निकालें, पानी में उंगलियाँ नहीं डुबाना चाहिए।

# भारत का संविधान

*भाग 4क*

# नागरिकों के मूल कर्त्तव्य

**अनुच्छेद 51 क**

**मूल कर्त्तव्य**– भारत के प्रत्येक नागरिक का यह कर्त्तव्य होगा कि वह–

(क) संविधान का पालन करे और उसके आदर्शों, संस्थाओं, राष्ट्रध्वज और राष्ट्रगान का आदर करे;

(ख) स्वतंत्रता के लिए हमारे राष्ट्रीय आंदोलन को प्रेरित करने वाले उच्च आदर्शों को हृदय में संजोए रखें और उनका पालन करे;

(ग) भारत की संप्रभुता, एकता और अखंडता की रक्षा करें और उसे अक्षुण्ण बनाए रखे;

(घ) देश की रक्षा करे और आह्वान किए जाने पर राष्ट्र की सेवा करे;

(ङ) भारत के सभी लोगों में समरसता और समान भ्रातृत्व की भावना का निर्माण करे जो धर्म, भाषा और प्रदेश या वर्ग पर आधारित सभी भेदभावों से परे हो, ऐसी प्रथाओं का त्याग करे जो महिलाओं के सम्मान के विरुद्ध हो;

(च) हमारी सामासिक संस्कृति की गौरवशाली परंपरा का महत्त्व समझे और उसका परिरक्षण करे;

(छ) प्राकृतिक पर्यावरण की, जिसके अन्तर्गत वन, झील, नदी और वन्य जीव हैं, रक्षा करे और उसका संवर्धन करे तथा प्राणिमात्र के प्रति दयाभाव रखे;

(ज) वैज्ञानिक दृष्टिकोण, मानववाद और ज्ञानार्जन तथा सुधार की भावना का विकास करे;

(झ) सार्वजनिक संपत्ति को सुरक्षित रखे और हिंसा से दूर रहे;

(ञ) व्यक्तिगत और सामूहिक गतिविधियों के सभी क्षेत्रों में उत्कर्ष की ओर बढ़ने का सतत् प्रयास करे, जिससे राष्ट्र निरंतर बढ़ते हुए प्रयत्न और उपलब्धि की नई ऊँचाइयों को छू सके ; और

(ट) यदि माता-पिता या संरक्षक है, छह वर्ष से चौदह वर्ष तक की आयु वाले अपने यथास्थिति बालक या प्रतिपाल्य को शिक्षा के अवसर प्रदान करे।

# सुरभिः

## ( तृतीयो भागः )

## अष्टमवर्गीय संस्कृतपाठ्यपुस्तकम्

म.प्र. राज्य शैक्षिक अनुसंधान और प्रशिक्षण परिषद्

सा विद्या या विमुक्तये

## समग्र शिक्षा

## मध्यप्रदेशराज्यशिक्षाकेन्द्रम्, भोपालम्

इस पुस्तक के मुद्रण में उपयोग किए गए कागज का स्पेसिफिकेशन
अन्त: पृष्ठों का मुद्रण कागज, 70 जी.एस.एम. वाटर मार्क मेपलिथो BIS गुणवत्ता IS 1848 (Part-I) : 2018
बाह्य पृष्ठों का कवर कागज- 250 जी.एस.एम., कोटेड एम.जी.
'पुस्तक के प्रत्येक पृष्ठ पर वाटर मार्क है'

वर्षम् 2023

प्रकाशनवर्षम्-2007 पुनर्मुद्रणवर्षम्-2008,2009,2010, 2011, 2012, 2013, 2014 , 2015 , 2016, 2017, 2018, 2019, 2020, 2021, 2022, 2023

© राज्यशिक्षाकेन्द्रम्

निर्देशनम् - एम.के. सिंहः, (आय.ए.एस.) आयुक्तः, मध्यप्रदेशराज्यशिक्षाकेन्द्रम्, भोपालम्

मार्गदर्शनम् - सन्तोषमिश्रः, अपरमिशनसञ्चालकः, मध्यप्रदेशराज्यशिक्षाकेन्द्रम्, भोपालम्

संयोजनम् - शकुन्तलाश्रीवास्तव, समन्वयक,पाठ्यक्रम-पाठ्यपुस्तक-शिक्षणाधिगम-सामग्रीनिर्माणम्, मध्यप्रदेशराज्यशिक्षाकेन्द्रम्, भोपालम्

विषयसमन्वयकः - डॉ. अशोककुमारव्यासः, मध्यप्रदेशराज्यशिक्षाकेन्द्रम्, भोपालम्

लेखकाः - प्रो. परमेश्वरनारायणशास्त्री, डॉ. बलरामपाण्डेयः, आचार्यलक्ष्मीनारायणपाण्डेयः, डॉ. रघुवीरप्रसादगोस्वामी, सूर्यानन्दपाण्डेयः, नरेन्द्रकुमारद्विवेदी, सुशीलकुमारगुप्तः

सम्पादकाः - आचार्यबालकृष्णभारद्वाजः, डॉ. रामचन्द्रतिवारी, डॉ. रामसेवकगुप्तः, डॉ. अञ्जनापाठक

मुखपुटम् - विकासमालवीयः, चित्राङ्कनम् - विनयसप्रे

आकल्पनम् - अक्षर ग्राफिक्स, भोपालम्

प्री-प्रेस कार्य - मध्यप्रदेश माध्यम

## मध्यप्रदेश-पाठ्यपुस्तक-स्थायी-समिति द्वारा अनुमोदितम्

| क्रमाङ्कः | नाम सङ्केतश्च | पदम् |
|---|---|---|
| 1. | डॉ. गोविन्दशर्मा, पूर्व-अतिरिक्त-सञ्चालकः, उच्चशिक्षा-मध्यप्रदेश-शासनम्, ग्वालियरम् | अध्यक्षः |
| 2. | डॉ. उमरावसिंहचौधरी, पूर्व-कुलपतिः, देवी-अहिल्याविश्वविद्यालयः, इन्दौरम् | सदस्यः |
| 3. | प्रो. उदयजैनः, पूर्व-प्राचार्यः, श्रीवैष्णववाणिज्यमहाविद्यालयः, इन्दौरम् | सदस्यः |
| 4. | डॉ. सुभाषगुप्ता, सङ्कायाध्यक्षः छात्रकल्याणम्, देवी-अहिल्याविश्वविद्यालयः, इन्दौरम् | सदस्यः |
| 5. | डॉ. (श्रीमती) बिनयराजाराम, हिन्दीविभागाध्यक्षा, श्रीसत्यसाईंमहिलामहाविद्यालयः, भोपालम् | सदस्या |
| 6. | प्रो. सुरेश्वरशर्मा, पूर्व-कुलपतिः, रानीदुर्गावतीविश्वविद्यालयः, जबलपुरम् | सदस्यः |
| 7. | डॉ. प्रकाशबरतूनिया, सहायकमहाप्रबन्धकः (आई.डी.बी.आई.), भोपालम् | सदस्यः |
| 8. | डॉ. मनमोहनउपाध्यायः, शिक्षाविद् एवम् उपाध्यक्षः, मध्यप्रदेश-संस्कृत-बोर्ड, भोपालम् | सदस्यः |
| 9. | श्री भगीरथकुमरावतः, शिक्षाविद्, भोपालम् | सदस्यः |
| 10. | आयुक्तः (पदेन), मध्यप्रदेशराज्यशिक्षाकेन्द्रम्, भोपालम् | सदस्यसचिवः |
| 11. | आयुक्तः (पदेन), लोकशिक्षणसञ्चालनालयः, भोपालम् | सदस्यः |
| 12. | सचिवः (पदेन), माध्यमिकशिक्षामण्डलम्, भोपालम् | सदस्यः |
| 13. | प्रबन्धसञ्चालकः (पदेन), मध्यप्रदेशपाठ्यपुस्तकनिगमः, भोपालम् | सदस्यः |
| 14. | प्रतिनिधिः, राष्ट्रियशैक्षिकानुसन्धान एवं प्रशिक्षणपरिषद्, नईदिल्ली | सदस्यः |
| 15. | प्रतिनिधिः, नवोदयविद्यालयः | सदस्यः |
| 16. | डॉ. प्रेमभारती, शिक्षाविद् सदस्यश्च-राज्यकार्यकारिणी-सर्वशिक्षा-अभियानम्, भोपालम् | आमन्त्रितसदस्यः |

# प्राक्कथनम्

भारतस्य प्रतिष्ठे द्वे "संस्कृतं संस्कृतिस्तथा" इत्याभाणकम् अतीव प्रसिद्धं सत्यम् अपि। विश्वे भारतस्य प्रतिष्ठायां संस्कृतस्य महत्त्वं सर्वे जानन्त्येव। संस्कृतं विना भारतस्य अन्यः प्रामाणिकः परिचयो नास्ति। भारतीयसंस्कृतेः भारतीयभाषाणां, भारतीयसाहित्यस्य च सन्दर्भे संस्कृतम् उपजीव्यत्वेन सिद्ध्यति, इत्यपि निश्चितमेव । प्राग्वैदिककालात् अद्यपर्यन्तं भारतीयं ज्ञानविज्ञानयुक्तं चिन्तनम् अस्यां भाषायां सुरक्षितं विद्यते। संस्कृतभाषायां मूल्यपरकविषयाणां नीति-धर्म-सदाचार-संस्कार-संस्कृति-साहित्यप्रभृतीनां महान् ज्ञानलोकः प्रतिष्ठितोऽस्ति। छात्राः एतेन वाग्वैभवेन परिचिताः भवेयुः। एतदर्थं संस्कृतस्य अध्ययनम् अध्यापनं च आवश्यकम्।

अत्र सम्भाषाणविधिना संस्कृतमाध्यमेन संस्कृतस्य अध्यापनदृष्ट्या अयं नवीनः पाठ्यक्रमः नवीनपाठ्यपुस्तकरूपेण प्रस्तूयते। अनेन छात्राः संस्कृतभाषायां सम्भाषणे अवगमने च सहजतया एव सक्षमाः भवितुमर्हन्ति ।इदानीं सर्वत्र देशविदेशेषु संस्कृतस्य प्रभावः महत्त्वञ्च दिनानुदिनं वर्धमानं दृश्यते। पाश्चात्याः अपि संस्कृतस्य वैज्ञानिकं महत्त्वं स्वीकुर्वन्तः सन्ति। भाषावैज्ञानिकदृष्ट्या-सङ्गणकदृष्ट्या-साहित्यदृष्ट्या च संस्कृतस्य महत्त्वमस्त्येव परमितोऽपि सामाजिकसमरसता-दृष्ट्या, राष्ट्रियैकतादृष्ट्या अपि संस्कृतस्य महत्त्वं विद्यते।

संस्कृतस्य एतन्महत्त्वं वीक्ष्य युगानुकूलविषयाणां विधीनां च समासतः प्रयोगेण इदं पुस्तकं निर्मितमस्ति। छात्राणां स्तरानुकूलं विषयवैविध्यमस्य पुस्तकस्य वैशिष्ट्यम्।

वयम् आशास्महे यदिदं पुस्तकम् उद्देश्यपूरणाय सार्थकं भवेदिति । पुस्तकविषये परामर्शाः परिषदा स्वीकारार्हाः भविष्यति-इति।

आयुक्तः
मध्यप्रदेशराज्यशिक्षाकेन्द्रम्,
भोपालम्

# संस्कृत कक्षा-8

## दक्षता आधारित पाठ्यक्रम

दक्षता

**कालखण्ड - 20**

1. श्रवण

8.1.1 गद्यांशों व पद्यांशों को बोध के साथ सुन सकेंगे, समझ सकेंगे व भाव ग्रहण कर सकेंगे।

8.1.2 कहानियों को सुनकर समझ सकेंगे व तथ्य ग्रहण कर सकेंगे।

8.1.3 पद्य/श्लोक/सुभाषित/नीतिश्लोक/सूक्तियों/ को सुनकर समझ सकेंगे व मूल्य ग्रहण कर सकेंगे।

8.1.4 संस्कृत में कहे गए आदेशों, निर्देशों व प्रश्नों को सुनकर समझ सकेंगे।

**कालखण्ड - 30**

2. वाक्

8.2.1 संज्ञा शब्दों के विभक्ति रूपों को शुद्ध व स्पष्ट उच्चारण के साथ बोल सकेंगे। इकारान्त नपुंसकलिंग वारि, उकारान्त नपुंसकलिंग मधु, ऋकारान्त पुंल्लिंग पितृ, कर्तृ, ऋकारान्त स्त्रीलिंग मातृ ,हलन्त-मरुत्, भवत्, राजन्, चन्द्रमस्, महत् आदि।

8.2.2 सर्वनाम-कति, अदस्, इदम्। इनके विभक्ति रूप शुद्ध उच्चारण के साथ बोल सकेंगे।

8.2.3 संख्यावाची-21 से 50 तक बोल सकेंगे।

8.2.4 पूर्व पठित धातुओं के अतिरिक्त विधिलिंग आत्मनेपद की धातुओं को शुद्ध व स्पष्ट उच्चारण के साथ बोल सकेंगे। जीव्, स्मृ, वह्, सृज्, तड् (ताड्) कम्प्, भाष्, लभ्, वृत् आदि।

8.2.5 नीतिश्लोक/सुभाषित/सूक्तियाँ शुद्ध एवं स्पष्ट उच्चारण के साथ बोल सकेंगे।

**कालखण्ड - 40**

3. पठन

8.3.1 गद्यांशों को पढ़ सकेंगे, अर्थ समझ सकेंगे व भाव ग्रहण कर सकेंगे।

8.3.2 कहानी/लेख/संवाद/नाटक आदि पढ़ सकेंगे व निहित मूल्य ग्रहण कर सकेंगे।

8.3.3 श्लोक/सुभाषित/नीतिश्लोक/सूक्तियों को पढ़ सकेंगे, अर्थ समझ सकेंगे व मूल्य ग्रहण कर सकेंगे।

| | | | |
|---|---|---|---|
| | | 8.3.4 | संज्ञा, सर्वनाम, विशेषण आदि के विभक्ति रूपों को शुद्ध रूप से पढ़ सकेंगे। |
| | | 8.3.5 | धातुरूपों को शुद्ध रूप से पढ़ सकेंगे। |
| | | 8.3.6 | स्वर, व्यंजन तथा विसर्ग संधियुक्त शब्दों को पढ़ एवं समझ सकेंगे। |
| | | 8.3.7 | क्त, ल्यप्, तुमुन्, क्तवतु, तरप्, तमप् आदि से बने शब्द/उपसर्गों से बने शब्द पढ़ एवं समझ सकेंगे। |
| | | 8.3.8 | सामासिक शब्दों को पढ़कर अर्थ समझ सकेंगे। |
| | | 8.3.9 | पत्र/सरल निबंध पढ़कर समझ सकेंगे। |
| | | | **कालखण्ड – 60** |
| 4. | लेखन | 8.4.1 | गद्यांशों/सुभाषित/श्लोक/नीतिश्लोक/सूक्तियों आदि को शुद्ध रूप में लिख सकेंगे। |
| | | 8.4.2 | संज्ञा, सर्वनाम, विशेषण आदि के विभक्ति रूपों को लिख सकेंगे। |
| | | 8.4.3 | कारकों के सामान्य/विशिष्ट प्रयोगों के साथ वाक्य बना सकेंगे। (विशिष्ट प्रयोग–आरूह, विरम्, ऋते, अन्तिकम्, भयम्, प्रियम्, करण, खञ्ज) |
| | | 8.4.4 | अव्ययों के प्रयोग द्वारा वाक्य बना सकेंगे। तथापि, तर्हि, परन्तु अनु प्रायः, सहसा, शतशः,नित्यम्, मिथ्या, खलु, कृते, अग्रतः,बहुधा, दूरम्। |
| | | 8.4.5 | प्रश्नों के उत्तर संस्कृत में लिख सकेंगे। |
| | | 8.4.6 | स्वर, व्यंजन, विसर्ग संधियुक्त शब्द लिख सकेंगे, विच्छेद कर समझ सकेंगे। |
| | | 8.4.7 | सामासिक शब्द लिख सकेंगे व विग्रह कर सकेंगे। |
| | | 8.4.8 | पत्र/प्रार्थना पत्र/परिचित विषय/चित्र पर 10 वाक्य लिख सकेंगे। |
| | | | **कालखण्ड – 30** |
| 5. | भाषा तात्त्विक क्षमताएँ | 8.5.1 | किसी विषय पर 10 वाक्य लिख सकेंगे। |
| | | 8.5.2 | पत्र/आवेदन पत्र लिख सकेंगे। |
| | | 8.5.3 | लेख/कहानी/श्लोक/संवाद/नाटक आदि के तथ्यों को समझ सकेंगे। |
| | | 8.5.4 | स्वर, व्यंजन, विसर्ग सन्धियुक्त पदों को पहचान कर विच्छेद कर सकेंगे तथा अर्थ समझ सकेंगे। |
| | | 8.5.6 | अव्ययों के प्रयोग से सरल व छोटे वाक्य बना सकेंगे। |
| | | 8.5.7 | श्लोक/नीतिश्लोक/सूक्तियों का सही प्रसंग में उपयोग कर सकेंगे। |
| | | 8.5.8 | कारकों के विशिष्ट प्रयोगों को समझ सकेंगे। |

**कुल कालखण्ड – 180, कुल अंक– 100**

**शेष कालखंडों में उपचारात्मक शिक्षण, विषय वस्तु की पुनरावृत्ति एवं मूल्यांकन करवाया जाय।**

# विषयवस्तु-विभाजन

**प्रथममासः** – कक्षा 7 की दक्षताओं पर आधारित ज्ञान का आकलन/चर्चा। संस्कृत-श्लोक/गीतगायन, क्रीडा आदि। वन्दना श्लोकों का कण्ठस्थीकरण। **प्रथमः पाठः** – **'लोकहितं मम करणीयम'** लोकहित के कार्यों एवं उसके महत्त्व पर चर्चा। सस्वर गायन, सस्वर अनुगायन एवं अन्य संस्कृत गीतों को सस्वर गायन। **द्वितीयः पाठः** – **'कालज्ञो वराहमिहिरः'** प्राचीन भारतीय वैज्ञानिकों पर चर्चा, वराहमिहिर के कार्यों पर चर्चा, नक्षत्रगणना पर चर्चा, वेधशाला का सामान्य परिचय। 21 से 50 तक संस्कृत संख्याओं का अभ्यास। **मासिक मूल्यांकन।**

**द्वितीयमासः** – **तृतीयः पाठः** – **'गणतन्त्रदिवसः'** भारत के प्रमुख राष्ट्रीय पर्वों पर चर्चा, गणतंत्र दिवस का महत्त्व, राष्ट्रभक्तिमय संस्कृत गीतों का सङ्कलन एवं उनका सस्वर गायन। **चतुर्थः पाठः** – **'नीतिश्लोकाः'** नीतिश्लोक से आशय, उनका जीवन में महत्त्व, सस्वरगायन, सस्वर अनुगायन, कण्ठस्थीकरण, अन्वय, अन्य नीतिश्लोकों का सङ्कलन, श्लोकों पर आधारित अन्त्याक्षरी का आयोजन, नीतिश्लोकों के रचयिताओं के नाम। **पञ्चमः पाठः** – **'अहम् ओरछा अस्मि'** आत्मकथा शैली का सामान्य परिचय, मध्यप्रदेश के मानचित्र पर ओरछा सहित प्रमुख ऐतिहासिक नगरों का निरूपण एवं चर्चा। कारक एवं उनका प्रयोग। **मासिक मूल्यांकन।**

**तृतीयमासः** – **षष्ठः पाठः** – **'स्वामी विवेकानन्दः'** स्वामी विवेकानन्द सहित आधुनिक भारत के प्रमुख सन्तों के विषय में चर्चा एवं देश व समाज पर उनका प्रभाव, स्वामी विवेकानन्द के साहित्य का अध्ययन। **सप्तमः पाठः 'ऐक्यबलम्'** 'एकता ही बल है' विषय पर चर्चा, ऐक्यमूलक अन्य कथाओं का सङ्कलन। अव्ययों की पहचान एवं प्रयोग। पाठ 1 से 7 तक का काठिन्य निवारण, पुनरावलोकन, विविध प्रश्नावली-1। **मासिक मूल्यांकन।**

**चतुर्थमासः** – **अष्टमः पाठः** – **'यक्षप्रश्नाः'** महाभारत पर सामान्य चर्चा, यक्ष प्रश्न से अभिप्राय, श्लोकों का सस्वर गायन, अन्वय, महाभारत की अन्य शिक्षाप्रद कथाओं का सङ्कलन एवं अध्ययन। **नवमः पाठः** – **'वसन्तोत्सवः'** प्रमुख भारतीय उत्सव एवं ऋतुओं पर चर्चा, हमारे जीवन पर उनका प्रभाव, वसन्तोत्सव-आयोजन का विविध स्वरूप। **दशमः पाठः**– **'आजादचन्द्रशेखरः'** देश के प्रमुख स्वाधीनता सेनानियों पर चर्चा, चन्द्रशेखर आजाद का देश की स्वतंत्रता में योगदान संबंधी विमर्श, चन्द्रशेखर आजाद के जीवनवृत्त का सङ्कलन एवं अध्ययन। प्रत्यय परिचय। **मासिक मूल्यांकन।**

**पञ्चममासः** – **एकादशः पाठः** – **'सुभाषितानि'** सुभाषित का अर्थ एवं जीवन में महत्त्व, सस्वर गायन, अनुगायन, अन्वय, अन्य सुभाषितों का सङ्कलन, श्लोक-अन्त्याक्षरी का आयोजन। **द्वादशः पाठः** – **'चित्रकूटम्'** मध्यप्रदेश के प्रमुख तीर्थस्थलों के विषय में चर्चा, रामायणादि ग्रन्थों में चित्रकूट के वर्णन की चर्चा, मध्यप्रदेश के मानचित्र पर चित्रकूट सहित प्रमुख तीर्थस्थलों का निरूपण। सन्धि परिचय। **मासिक मूल्यांकन।**

**षष्ठमासः** – **त्रयोदशः पाठः** – **'आचार्योपदेशाः'** शिवाजी एवं उनके गुरु श्री रामदास विषयक चर्चा। शिवाजी के चरित्र निर्माण में गुरु रामदास की भूमिका। शिवाजी के जीवनवृत्त का अध्ययन। समास परिचय। **चतुर्दशः पाठः**– **'देवी अहिल्या'** प्रमुख आधुनिक भारतीय नारियों की चर्चा, देवी अहिल्या सम्बन्धी चर्चा। पात्रानुसार वाचन। पाठ 8 स 14 तक का काठिन्यनिवारण, पुनरावृत्ति। विविध प्रश्नावली-2। **अर्द्धवार्षिक मूल्यांकन।**

**सप्तममासः** – **पञ्चदशः पाठः – 'कूटश्लोकाः'** कूटश्लोक विषयक चर्चा, तात्पर्य एवं महत्त्व, अन्य संस्कृत पहेलियों एवं कूटश्लोकों का सङ्कलन। **षोडशः पाठः – 'कवित्वं कालिदासस्य'** प्रमुख संस्कृत कवियों पर चर्चा, कालिदास पर विस्तृत चर्चा, कालिदास के साहित्य का अध्ययन। शब्द रूप। **सप्तदशः पाठः–'सत्कर्म एव धर्मः'** संस्कृतकथा साहित्य पर चर्चा, विक्रम–कथा पर चर्चा। **मासिक मूल्यांकन।**

**अष्टममासः** – **अष्टादशः पाठः– 'प्रियदर्शिनी इन्दिरा'** स्वतंत्रता उपरान्त प्रसिद्ध भारतीय नारियों की चर्चा, इन्दिरा गांधी का जीवन परिचय एवं उनके जीवन चरित्र का अध्ययन।**नवदशःपाठः–'हट्टभ्रमणम्'** भारतीय सामाजिक जीवन में मेलों/बाजारों की उपयोगिता। पत्र विधा पर चर्चा। दैनिक उपयोगी वस्तुओं के संस्कृत नामों का संकलन, समीपस्थ बाजार/मेले का वर्णन। धातु रूप। **मासिक मूल्यांकन।**

**नवममासः** – **विंशः पाठः – 'नर्मदा'** मध्यप्रदेश की नदियों पर चर्चा, नर्मदा का महत्त्व, प्राकृतिक सौन्दर्य एवं नर्मदा तटीय प्रसिद्ध तीर्थस्थलों पर चर्चा, भारत के मानचित्र पर नर्मदा का आद्यन्त मार्ग निरूपण। **एकविंशः पाठः–'सूक्तयः'** सूक्ति का अर्थ, महत्त्व। अन्य सूक्तियों का सङ्कलन। पत्रलेखन एवं निबन्ध रचना। पाठ 15 से 21 तक काठिन्य निवारण। विविध प्रश्नावली–3। **मासिक मूल्यांकन।**

**दशममासः** – **वार्षिक मूल्यांकन।**

# सीखने के प्रतिफल

SKT-801. संस्कृत में लिखित/मुद्रित सामग्री को शुद्ध उच्चारण के साथ पढ़ते हैं।

SKT-802. संस्कृत पद्यों का गायन करते हैं।

SKT-803. पद्यों व गद्यांशों का अर्थ बताते हैं।

SKT-804. प्रश्नों के उत्तर संस्कृत में देते हैं।

SKT-805.. संस्कृत संख्याओं का प्रयोग करते हैं।

SKT-806. निर्देशानुसार वाक्यों में लिंग, काल, वचन परिवर्तन करते हैं।

SKT-807. लकार एवं शब्द रूपों का प्रयोग करते हैं।

SKT-808. कारकों के प्रयोग से वाक्य बनाते हैं।

SKT-809. संधि विच्छेद एवं संधि करते हैं एवं नाम बताते हैं।

SKT-810. सामासिक शब्दों का विग्रह करते हैं।

SKT-811. दिये गये विषय पर संस्कृत मे वाक्य रचना करते हैं।

SKT-812. दिये गये शब्दों के आधार पर पत्र लिखते हैं।

# अनुक्रमणिका


| क्रमाङ्कः | पाठः | विधा | पृष्ठक्रमाङ्कः |
|---|---|---|---|
| प्रथमः पाठः | लोकहितं मम करणीयम् | गीतम् | 1 |
| द्वितीयः पाठः | कालज्ञो वराहमिहिरः | निबन्धः | 4 |
| तृतीयः पाठः | गणतन्त्रदिवसः | संवादः | 7 |
| चतुर्थः पाठः | नीतिश्लोकाः | पद्यम् | 12 |
| पञ्चमः पाठः | अहम् ओरछा अस्मि | आत्मकथा | 16 |
| षष्ठः पाठः | स्वामी विवेकानन्दः | निबन्धः | 19 |
| सप्तमः पाठः | ऐक्यबलम् | कथा | 23 |
| **विविधप्रश्नावलिः – 1** | | | **26** |
| अष्टमः पाठः | यक्षप्रश्नाः | पद्यम् | 31 |
| नवमः पाठः | वसन्तोत्सवः | गद्यम् | 34 |
| दशमः पाठः | आजादचन्द्रशेखरः | संवादः | 37 |
| एकादशः पाठः | सुभाषितानि | पद्यम् | 41 |
| द्वादशः पाठः | चित्रकूटम् | निबन्धः | 44 |
| त्रयोदशः पाठः | आचार्योपदेशाः | नाट्यांशः | 48 |
| चतुर्दशः पाठः | देवी अहिल्या | संवादः | 53 |
| **विविधप्रश्नावलिः – 2** | | | **57** |
| पञ्चदशः पाठः | कूटश्लोकाः | पद्यम् | 62 |
| षोडशः पाठः | कवित्वं कालिदासस्य | निबन्धः | 66 |
| सप्तदशः पाठः | सत्कर्म एव धर्मः | कथा | 71 |
| अष्टादशः पाठः | प्रियदर्शिनी इन्दिरा | निबन्धः | 74 |
| नवदशः पाठः | हट्टभ्रमणम् | पत्रम् | 77 |
| विंशः पाठः | नर्मदा | निबन्धः | 80 |
| एकविंशः पाठः | सूक्तयः | पद्यम् | 84 |
| **विविधप्रश्नावलिः – 3** | | | **88** |
| **परिशिष्टम्** | | | **93** |
| **अभ्यासप्रश्नपत्रप्रारूपम्** | | | **122** |

# वन्दना



शुक्लां ब्रह्मविचारसारपरमामाद्यां जगद्व्यापिनीम्,
　　　वीणापुस्तकधारिणीमभयदां जाड्यान्धकारापहाम्।
हस्ते स्फाटिकमालिकां विदधतीं पद्मासने संस्थिताम्,
　　　वन्दे तां परमेश्वरीं भगवतीं बुद्धिप्रदां शारदाम्॥

तमीश्वराणां परमं महेश्वरम्
　　　तं देवतानां परमं च दैवतम्।
पतिं पतीनां परमं परस्तात्
　　　विदाम देवं भुवनेशमीड्यम्॥



विद्यार्थियों को ऐसी तालीम दी जानी चाहिए जिससे वे संसार के महान धर्मों को आदर के साथ सीख सकें।

–महात्मा गांधी

# राष्ट्र-गीत

## वन्दे मातरम्

श्री बंकिमचंद्र चट्टोपाध्याय : आनन्दमठ

वन्दे मातरम्, वन्दे मातरम्।
सुजलाम् सुफलाम् मलयज शीतलाम्।
शस्य श्यामलाम् मातरम्। वन्दे मातरम्।।
शुभ्रज्योत्स्नाम् पुलकित यामिनीम्।
फुल्ल कुसुमित द्रुमदल शोभिनीम्।।
सुहासिनीम् सुमधुरभाषिणीम्।
सुखदाम् वरदाम् मातरम्। वन्दे मातरम्।।